
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥१॥

॥श्रीगणेशाय नमः॥ श्रीरामचंद्राय नमः॥ स्वप्रकाशस्य हेतुर्यः पर
मात्मा चिदात्मकः॥ अपरोक्षानुभूत्याख्यः सोहमस्मि परं सुखं॥१॥
सर ईशगुर्वात्माभेदाद्यैकल व्यवहारभूः॥ औपाधिकः स्वचिन्मात्रः सो
परोक्षानुभूतिकः॥२॥ तदेवमनुसंधाय निर्विघ्नां स्वेष्टदेवतां॥ अ
परोक्षानुभूत्याख्यां माचार्योक्तिं प्रकाशये॥३॥ यद्यपीयं [illegible] ततः स्पष्टा त स्वप
थापि स्वात्मशुद्धये॥ यत्नोयं सोपि संक्षेपात्क्रियते न यथेनाशनः॥४॥
कांहं मुल्काकरुकार्यं सूर्ये स्तेजोनिधिः किल॥ तथापि भक्तिमान्लोकः
किं न कुर्यात्स्वहितास्पये॥ तत्राचार्याः स्वेष्टपरदेवतानुसंधानलक्ष
णं मंगलं निर्विघ्नं ग्रंथसमाप्तये स्वमनसि कृत्वा शिष्यशिक्षा
यै ग्रंथादौ निबध्नंति॥ श्रीहरिं परमात्मानमुपदेष्टारमीश्वरं॥ व्या
पकं सर्वलोकानां कारणं तं नमाम्यहं॥१॥ अहं तन्नमामीत्यन्वयः
॥अत्रेयं प्रक्रिया॥ पदार्थो विद्विविधः॥ ईश्वरो जीवश्चेति॥ एताव

॥१॥

पि द्विविधौ शुद्धाशुद्धभेदात्॥ तत्राशुद्धो मायाअविद्योपाधि
त्वेन भेदव्यवहारहेतुः शुद्धो त्वभेदव्यवहारहेतुः॥ तथा नामा
पि त्रिविधः॥ कारणं सूक्ष्मस्थूलभेदात्॥ एतदेव शरीरत्रयमिति अभि
ह्रीं धीयते॥ एवं चिज्जडरूपं वैलक्षण्यात् तमःप्रकाशयोरिव भक्त्यो विर
योरुभयोरात्मानात्मनोरविवेक एव बंधकारणं॥ तयोर्वि
वेकस्तु मोक्षकारणमिति दिक्॥ तत्र तावदहंशब्देन देहत्रय
विशिष्टत्वेनाशुद्धो जीवः अस्येवापरोक्षत्वात्॥ तं नमामि मा
यातत्कार्यशून्यत्वेपि तदाश्रयभूतत्वेन सर्वकारणं वेदांत
प्रसिद्धमीश्वरं एतस्यैव सर्वोत्कृष्टत्वान्नमामि नमस्करोमि
स्वात्मत्वेनानुसंदधामीत्यर्थः॥ तदेव सर्वोत्कृष्टत्वेनानुसंधान
योग्यत्वमाह॥ श्रीहरिं श्रीयद्धानमित्यर्थः॥ ह्रियते इति हरिः॥ सर्वा
धार

॥ सर्वोत्कृष्टत्वेनांतेस्वरूपतयास्वीक्रियते प्रलयसुप्त्यादौ सर्वं भु
तेरितिय द्वाश्री जीवस्वापाधिभुता ऽविद्यातां हरत्यात्मज्ञानप्रद
नेननाशयातौ श्रीगहरिः॥ यद्वा सत्त्वस्य सर्वोपाधिस्थानत्वा श्रीहरीत्युच्य
ते। सत्त्वहरिस्तं ननु किमनेना विद्यातत्कार्यहरणेनेत्याशंक्य परम
पुरुषार्थप्राप्तिर्भवतीत्याह॥ परमानंदं परमोऽविनाशित्वनिरति
शयत्वाभ्यां उत्कृष्ट आनंदः॥ सुखविशेषस्तद्रूपमित्यर्थः॥ तर्हि वै
षयिकसुखवज्जडः स्यादित्यत आह॥ उपदेष्टारमाचार्यद्वा
रात्मसुखोपदेशकं चिद्रूपमित्यर्थः॥ ननु केवलानंदस्य कथं
मुपदेष्टृत्वमित्यत आह॥ ईश्वरमीष्टेऽसावीश्वरस्तं नमामीत्यन्व
यः॥ चिन्नित्रशक्तित्वात्सर्वसामर्थ्यमित्यर्थः॥ एवमपि परिच्छि
न्नत्वाद्घटादिवन्नाशित्वं स्यादित्यत आह॥ व्यापकं स्वसत्तास्व
प्रकाशाभ्यां नामरूपव्याप्तिः सव्यापकस्तं

॥२॥

परिच्छेदकस्य देशकालादेरभावात् कालादनंतमित्यर्थः॥ ननु व्याप्यव्यापकभावेनानं
तत्वमसिद्धमत आह॥ सर्वलोकानां कारणमभिन्ननिमित्तोपादानमित्यर्थः॥ सत्यंज्ञान
मनंतं ब्रह्म आत्मनात्मानमभिसंबभूवेत्यादिश्रुतेः॥१॥ इदानीं शिक्षावसरत्वये ऽनुबंध
चतुष्टयं दर्शयिन्स्वचिकीर्षितं प्रतिजानीते॥ अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये॥
सद्भिरेवं प्रयत्नेन वीक्षणीया मुहुर्मुहुः॥२॥ वेदस्यैव येन विद्वदनुभवं प्रमाणयति॥ तथा
चायमर्थः॥ विद्वदनुभवप्रसिद्धा यातत्वमस्यादिमहावाक्यश्रवणजा प्रसग्भिन्नवि
षया अपरोक्षानुभूतिरक्षाणामिंद्रियाणां परोक्षातीता न भवती। अपरोक्षमिंद्रियाधि
ष्टानत्वप्रकाशकत्वाभ्यां नित्यापरोक्षं स्वप्रकाशमात्मा। तत्वं तस्यानुभूतिर्दृश्यारूढा
रखंडता॥ यद्वा अपरोक्षा चासावनुभूतिश्चेत्यपरोक्षानुभूतिर्विद्यापरपर्यायो ब्रह्मसा

क्षात्कारस्तत्साधनत्वेन ग्रंथोप्युपनिषच्छब्दवदपरोक्षानुभूतिशब्देनोपचर्यते॥
अतएवावलोकनमात्रेणैवोत्तमाधिकारिणां ब्रह्मात्मसाक्षात्कारकरणं ग्रंथवि
शेषइत्यर्थः॥ अनेन नित्यापरोक्षब्रह्मात्मतत्त्वं विषयो दर्शितः॥ साप्रोच्यते क
थ्यत इत्यर्थः॥ अस्माभिः पूर्वाचार्यैरित्यर्थो दष्याहारः॥ ननु प्रयोजनमनुद्दिश्य न
मंदोपि प्रवर्तत इति न्यायात्कारंभणीयो ग्रंथ इत्याशंकया प्रयोजनमाह॥ मोक्षसि
द्धये मोक्षो नामस्वाविद्याकल्पितानात्मदेहाद्यात्मत्वाभिमानरूपबंधनिवृत्तिद्वा
रा परमानंदावाप्तिरूपं प्रयोजनं दर्शितं॥ किंलक्षणाऽपरोक्षानुभूतिः सद्भिः साधु
भिर्नित्यानित्यविवेकादिसाधनचतुष्टयसंपन्नैर्मुमुक्षुभिरित्यर्थः॥ एवं शब्दान्नान्यैः
कर्मोपासनाधिकारिभिरिति भावः॥ मुहुर्मुहुर्नैरंतर्यदीर्घकालाभ्यां प्रयत्नेन स्ना

ज५

३

नभिक्षादावप्यनादरं कुलेत्यर्थः ॥ वीक्षणीयागुरुमुखादवगत्य विचारणीया ॥ अ

नेन मुमुक्षुरधिकारी दर्शितः ॥ एतेनैवार्थात्पूर्वकांडोत्तरकांडयोः साध्यसाधन

भावः ॥ संबंधश्च दर्शितो भवतीति बोद्धव्यः ॥ ननु कार्यस्य कारणाधीनत्वात्पू

र्वोक्तसाधनचतुष्टयस्य किं कारणमित्याशंक्याह ॥ ७ ॥ स्ववर्णाश्रमधर्मेण तपसा

हरितोषणात् ॥ साधनं च भवेत्पुंसां वैराग्यादिचतुष्टयं ॥ २ ॥ अत्र स्वशब्देन ॥ मुख्य

गौण मिथ्येति त्रिविधेषु सा क्षिपुत्रादिदेहादिलक्षणेषु सीत्स्वसुमध्ये मिथ्यात्मा या

ग्यत्वात् गृह्यते ॥ तस्य देहादेर्ब्राह्मणादि वर्णब्रह्मचर्याद्याश्रमप्रयुक्तेन धर्मेण ब्रह्मा

र्पणकृतकर्मानुष्ठानजन्येनापूर्वेणापूर्वमिसोमो प्रसिद्धेन भावि फला धारभूतेन पु

ण्यादिशब्दवाच्येनेत्यर्थः ॥ तथा तपसा कृच्छ्रचांद्रायणादिना पापक्षितेन पुनः ह

रितोषणायद्भगवत्प्रीतिकरात् सर्वभूतदयालक्षणात्कर्मविशेषात्॥ एतैस्त्रिभिः साध
नैः वैराग्यादिचतुष्टयरूपसाधनं मोक्षसाधको धर्मविशेषो भवेत्संभावनायां लि
ङ्॥ यद्वैवमन्वयः॥ स्ववर्णाश्रमरूपेणात्तपसा हुताय हरितोषणात्तस्मादिति॥ यद्यपि
साधनचतुष्टयस्य विवेकादेर्हेतुहेतुमद्भावनात्तथापि वैराग्यस्यासाधारणकारणतां
द्योतयितुमादौ ग्रहणं कृतमिति बोद्धव्यं॥ ३॥ कीदृशं तद्वैराग्यादिचतुष्टयमित्याकां
क्षायां तत्स्वरूपमेव व्याचष्टे ब्रह्मादित्यारभ्योक्तसाधनेयं तेन श्लोकषट्कसमूहेन ग्रंथे
न॥ ४॥ ब्रह्मादिस्थावरांतेषु वैराग्यं विषयेष्वनु॥ यथैव काकविष्ठायां वैराग्यं तद्धि
निर्मलं॥ ५॥ ब्रह्मादिस्थावरांतेषु सत्यलोकादिमर्त्यलोकांतेषु विषयेषु भोगसा
धनेषु अनुकर्मजन्यत्वेनानित्यत्वं लक्षीकृत्येत्यर्थः॥ वैराग्यं त्यागेच्छा तत्र

त १

दृष्टोमात॥ यथैव काकविष्ठायां वैराग्यं गर्दभादिविष्ठायामरणं उपलक्ष
णमेतद्ब्रह्मवीतादीनां अत्र हेतुः स्थिरस्मात्तद्वैराग्यं निर्मलं रागादिमलरहि
तं॥४॥ इदानीं वैराग्यकारणं विवेकं लक्षयति॥ नित्यमात्मस्वरूपं हि
दृश्यं तद्विपरीतगं॥५॥ एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै॥ भावेप्रसि
द्धः सः वस्तुनः पदार्थस्य विवेको विवेचनविशेषो ज्ञेयः॥ स कुत्र स्यात आह॥ यत्एवं
प्रकारेण सम्यक् संशयादिशून्यो निश्चय एव कथमित्याह॥ [illegible]ति विद्वदनु
भवप्रसिद्धमात्मस्वरूपं नित्यमविनाशि अबाध्यं समित्य[illegible] अविनाशी

ना

वा अरे ऽयमात्मेति श्रुतेः॥ दृश्यमनात्मस्वरूपं तद्विपरीतं॥ तस्माद्विप
रीतत्वेन गच्छति प्राप्नोति॥ व्यवहारक्षमो ऽस्ति॥ तथाविधं विनाशि बाध्य
मित्यर्थः॥ अत्रेदमनुमानमपि सूचितं भवति॥ आत्मस्वरूपं नित्यं दृष्टत्वात् य

(३)

॥५॥

न नित्यं तन्न दृष्टं यथा घटादीति केवलव्यतिरेकी हेतुः ॥ तथाऽनात्मस्व
रूपं अनित्यं दृश्यत्वात् ॥ यन्न अनित्यं तन्न दृश्यं । यऽथात्मस्वरूपमित्यय
मपि केवलव्यतिरेकी हेतुः ॥५॥ तदेव वैराग्यकारणं विवेकं व्याख्याय वैरा
ग्यकार्यं शमादिषट्कं लक्षयति ॥ सदेत्यादि त्रिभिः श्लोकैः ॥ सदैव वासना
त्यागः शमोऽयमिति शब्दितः ॥ निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥६॥
विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ॥ सहनं सर्वदुःखानां तितिक्षा सा
शुभा मता ॥७॥ निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता ॥ चित्तैकाग्र्यं
तु सल्लक्ष्ये समाधानमिति स्मृतं ॥८॥ सदैव सर्वस्मिन्नपि वासनात्यागः ॥
पूर्वसंस्कारोपेक्षायं शम इति शब्दितांतःकरणनिग्रहः शमशब्दार्थ इत्यर्थः ॥
बाह्यवृत्तीनां श्रोत्रवागादीनां निग्रहो निषिद्धप्रवृत्तितिरस्कारो दम इति

॥५॥

शब्देनाभिधीयते ॥६॥ इति प्रसिद्धेभ्यो विषयेभ्यो बाधकेभ्यः शब्दादि
भ्यो यापरावृत्तिरनित्यत्वादिदोषदर्शनेन ग्रहणाऽनिच्छा सा पारतिरस्य
तदित्यर्थः ॥ अनेन सर्वकर्मसंन्यासोपलक्ष्यते तत्र हेतुमाह ॥ दुःखापाप
रमोऽन्यथाऽसत्तानसाधनत्वात् इत्यर्थः ॥ किंच सर्वदुःखानां सर्वदुःखसाध
नानां शीतोष्णादिद्वन्द्वानामित्यर्थः ॥ यत्सहनं प्रतिकारानिच्छा सा शुभा
सुखरूपा तितिक्षा मता विदुषामित्यर्थः ॥७॥ अपिच निगमाचार्यवाक्येषु [illegible] वेद
गुरुवचनेषु यद्वोपनिषद्व्याख्यातृउपदेशेषु भक्तिर्जनं विश्वास इत्यर्थः ॥
श्रद्धेति विश्रुता वेदान्तप्रसिद्धा तु पुनः संलक्ष्ये सदेवसौम्येदमग्र आसीदि
सादिश्रुतिलक्ष्ये प्रसगापिन्ने ब्रह्मणि चित्तैकाग्र्यं तदेकजिज्ञासेत्यर्थः ॥
तत्समाधानमिति स्मृतं ॥८॥ एवं शमादिषट्कमभिधाय तत्कार्यभूतां मुमु

(5)

क्षामाह ॥ ५ ॥ संसारबंधनिर्मुक्तिः कथं स्यान्मे कदा विधे ॥ इति या सुदृढा
बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥ इति या सुदृढा बुद्धिः सा मुमुक्षा वक्तव्येत्यन्व
यः ॥ साकेसत आह ॥ भो विधे महेश्वर यद्वा सर्वकर्त्तः विधातः ब्रह्मन् मे मम सं
सारबंधनिर्मुक्तिर्नानायोनिसंबंधनिवृत्तिः । कदा कस्मिन्काले कथं केन प्र
कारेण भवेदिति एवंरूपा बुद्धिर्मुमुक्षुत्वमित्यर्थः ॥ ९ ॥ इदं साधनचतुष्टयं यद
र्थमुपन्यस्तं तद्दिदर्शयति ॥ ६ ॥ उक्तसाधनयुक्तेन विचारः पुरुषेण
हि ॥ कर्त्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥ ७ ॥ उक्तानि ब्रह्मादिसारभ्य संसा
रेत्यं तग्रंथसंदर्भेण वर्णितानि यानि वैराग्यादिसाधनानि ज्ञानोपकरणा
नि ॥ तैर्युक्तेन पुरुषेणाधिकारिदेहवता मनुष्यत्तमेन रात्ति खिद्धप्रसिद्धत्वे
न वक्ष्यमाणलक्षणो यद्वा हि सच्चयमेवार्थे अन्यनिषेधार्थः ॥ विचारो विवे ॥ ६ ॥

आ।

कः कर्त्तव्य[illegible]दत्तैव्यः ।। किमर्थमित्यत आह ।। आत्मनोज्ञानसिद्ध्यर्थं
ब्रुमात्मैक्यबोधोद्भवनाय। ननु आत्मज्ञानसिद्ध्या कः पुरुषार्थ इत्या
शंक्यमोक्षाख्यचतुर्थपुरुषार्थरूपफलं स्यादित्यनपुरुषं विज्ञानब्रह्मशुभं
परमानंदरूपत्वेन मंगलं मोक्षसुखमित्यर्थः ।। इच्छता प्रार्थयता अस्म
नः श्रुभमितिवा ऽन्वयः ।। १० ।। ननु ज्ञानसिद्ध्यर्थं विचार एव कर्त्तव्य इति नि
यमः कुतो क्रियत इत्याशंक्य सदृष्टांतमाह ।। नोत्पद्यते विना ज्ञानं वि
चारेणान्यसाधनैः ।। यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ।। ११ ।।
विचारेण विना अन्यसाधनैः कर्मोपासनालक्षणैर्ज्ञानं नोत्पद्य
ते अत्र दृष्टांतमाह ।। यथा क्वचित् कस्मिंश्चित्काले सूर्यादिप्रका दे २
शेन विना पदार्थभानं घटादिवस्तुप्रकाशनं न भवति हीति सर्व
जनप्रसिद्धं तद्वदित्यर्थः ।। अतो नियमः क्रियत इति भावः ।। स

विचारः कीदृश इत्यत आह ॥ ७॥ कोऽहं कथमिदं जातं को वै कर्त्ता
स्य विद्यते ॥ उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥ १२ ॥
अहमहं कर्त्ता सुखी स्यादित्यवच्छिन्नप्रमाणः । कः किं स्वरूपः ॥
इदं परिदृश्यमानं स्थावरजंगमात्मकं जगत् कथं किंरूपं कस्मा
त्कारणाज्जातं उत्पन्नं । तथाऽस्य प्रत्यक्षादिप्रमाणसिद्धस्य
जगतः कर्त्तोत्पादकः को विद्यते वेद्यति विकल्पयोतयन्ति । किं
पं० ४ जीवो हरिः कर्त्ता विश्वम्भरः ॥ किं वान्यो देवः किंचिदिति विकल्पः ॥
किं चेह जगति उपादानं स्यात् पञ्चभूतात्मकं किमस्ति । अयमासां ज
गत्कारणविषये ईदृश एवं स्वरूपाविचारः स एव ज्ञानसाधनं इत्यर्थः ॥ १२ ॥
ननु चैतन्यविशिष्टः कोऽपि पुरुष इति वाऽहं स्यात् सत्त्वाद्देहकारणपरो

२ब

पतानि पृथिव्यादि चत्वारि भूतान्येवात्मेति चार्वाकाः वदंति स एव
कर्त्ता सुखी सादि सर्वव्यवहारमूलमिति सर्वजनप्रसिद्धो सत्या
मात्मविषयो विचारो न स्यादित्यत आह ॥ ७ ॥ नाहं भूतगणो देहो नाहं चा
क्षगणस्तथा ॥ एतद्विलक्षणः कश्चिद्विचारः सोयमीदृशः ॥ ७३ ॥
अहं महन्नाब्द प्रत्ययालंबनः ॥ भूतानां गणो यो देहः स न भवामि घटादिवत् ॥
त्वा॰ दृश्यत्वादित्यर्थः ॥ तर्हीन्द्रियगणस्त्वं स्या इति चार्वाकैकदेशिमतमुत्था
प्य दूषयति च पुनरक्षगणः श्रोत्रादींद्रियसंघातोप्यहं न भवामि ॥
स्या॰ तथेति पदेन देहवदिंद्रियाण्यपि भूतविकारत्वं दर्शितं ॥ स वा एष पुरुषो
अन्नरसमयः अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी
वागित्यादि श्रुतिरुभयत्र प्रमाणं ॥ ननु देहद्वयं यदि विनाशि तर्हि शून्य
मेव स्यादित्याशंक्याह ॥ एतद्विलक्षण एताभ्यां स्थूलसूक्ष्मदेहा

(7)

॥९॥ परी १ ५

भ्यांविव्रजितधर्मकोस्मि अस्थूलमनण्वह्रस्वमित्यादिस्मृतेः॥
कश्चिदिति ज्ञास्यादिरहितत्वान्मनोवाचामगोचरत्वाद्दर्शितं अयमी
दृशः॥ सविचार इति याख्यातार्थश्चतुर्थपदस्य श्लोकचतुष्टयेपि
बोधव्यः॥१३॥ तदेवकोस्मि यतन्निर्णयं चेदानीं कथमिदं जातमि
त्यस्यानिश्चयः क्रियते। ५। अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीय
ते॥ संकल्पो विविधः कर्त्ता विद्यो॥१४॥ तत्र पृथिव्यादिभूतका
र्यत्वात्स्वपरमाणुभ्यो जायत इति ताकिकादयः मन्यते। कर्म
णा जायत इति मीमांसकाः प्रधानादेवेति सांख्याः॥ तदेवति
रस्कुर्वन्नाह॥ सर्वं जगदिदं नामरूपात्मकमज्ञान
प्रभवमज्ञानात्स्वर्वोक्तस्वस्वरूपास्फुरणात्प्रभवति

४ ६ श्रि ४ ॥९॥

तत्तथाविधं॥ अत एवैतद्विरोधिना ज्ञानेन स्वस्वरूपस्फुरणेन तम इव प्रकारेण प्रविलीयते सर्वमित्यर्थः॥ कोवै कर्तेत्यस्य निर्णयमाह॥ संकल्पो विविधेति॥ विविधः नानाप्रकारः॥ संकल्प इदं करिष्यामीत्यादिलक्षणो ऽन्तःकरणपरिणामः॥ कर्तानुकूलव्यापारवानेव स एव पूर्वोक्तः॥ १४॥ अथोपादानं किमस्तीत्यस्य निर्णयमाह॥ घो॥ एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययं॥ यथैवमृद्घटादीनां विं॥ १५॥ एतयोरज्ञानसंकल्पयोर्यदुपादानं स्थितिनाशयोः कारणं तत्तु सत् कालत्रयाबाध्यं ब्रह्मैव नान्यदित्यर्थः॥ अत एवाधिष्ठानज्ञानेन निवर्त्यो ऽज्ञानकार्यत्वेन मिथ्याभूतमपि जगद्याधिष्ठानोदयं रज्जुसर्पादिवत्संसारभयव्यवहारक्षमं भवेदिति भावः॥ ब्रह्मणः सत्वे हेतुः अ

॥

(४)

व्ययमपक्षयरहितं। अजेनैतत्पूर्वव्यापि जन्मादिपंचविकारा:। निरस्ता: षड्भावविकाररहित्येपि हेतु:। एवं सजातीयविजातीयस्वगतभेदशून्यं तर्हि कुतो न दृश्यते तत्राह॥ सूक्ष्मं मनोवागादींद्रियागोचरं जातित्रियादिप्रवृत्तिनिमित्तशून्यत्वादित्यर्थ:॥ अत्र दृष्टांतमाह॥ यथैव मृन्मृत्तिकाघटादीनामुपादानं तथैवेत्यर्थ:॥ एवं कारेण कार्यकारणभेदो नाममात्र इति सूचितं॥१५॥

ननु यद्यपि कार्यकारणभेदो वाचारंभणमात्रस्तथापि जीवब्रह्मभेदो वास्तव:। स्यादित्याशंक्याह॥ ध्या॥ अहमेवोपि सूक्ष्मश्चिज्ञाता साक्षी सदव्यय:॥ तदहं तत्र संदेहोवि॥१६॥ तत्रेयत रस्य व्याहारस्तथा चायमर्थ:॥ यतोहमहंप्रत्ययवेद्योप्येक: सजातीयादिभेदशून्यो मनुष्यमात्रेऽहंबुद्धेरेकत्वप्रतीतेरित्यर्थ:॥ चपुन: सूक्ष्म इंद्रियागोचर:। पुन: ज्ञाताहंकारादिप्रकाशकत्वेन

चेतन इत्यर्थः ॥ तथा साक्षी साक्षादिंद्रियार्थसंनिकर्षं विनैवेक्षते ॥
पश्यति प्रकाशयतीति साक्षी निर्विकार इत्यर्थः । अत एव सद
व्ययः सर्वसाक्षी व्ययश्चाविनाशापक्षयोपलक्षितसर्वविका
रशून्य इत्यर्थः ॥ यस्मादेवंभूतो हं तत्तस्माद् हमहं प्रत्ययवेद्यस्तस्य
यज्ञानादिलक्षणं ब्रह्म अत्र संदेहो नास्तीत्यर्थः ॥ सोयमादृशो वि
चार इति ॥६॥ विचारप्रकरणात देवजीवैक्यमसान प्रकरणेन ब्र
दृढयति ॥ आत्मेत्यादि पंचभिः श्लोकैः ॥ छ ॥ आत्मा वै निष्कलो ह्ये
को देहो बहुभिरावृतः ॥ तयोरैक्यं प्रपश्यंति किमज्ञानमतःप
रं ॥१७॥ आत्मा नियामकश्चांतर्देहो नियम्यबाह्यकः ॥ त० ॥ वि०
॥१८॥ आत्मा ज्ञानमयः पूर्णो देहो मांसमयोऽशुचिः ॥ त० वि० ॥
॥१९॥ आत्माप्रकाशकः स्वच्छो देहस्तामस उच्यते ॥ त० ॥ वि० ॥
॥२०॥ आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः ॥ त० ॥ वि० ॥२१॥
छ

यतो हंप्रत्ययवेद्य आत्मा आतति संततभावेन जाग्रदादि सर्वावस्था
स्वनुवर्तते तद्रूपात्माऽवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञाना
दिस्वरूप इत्यर्थः ॥ स चैव पदलक्ष्यार्थो पि तत्पदलक्ष्यार्थ इव वि
निष्कलो विकलो बलानिर्गतकलो निरवयव इत्यर्थः ॥ अन्यथा सावय ॥४
दि५ वत्वे पटादिवद्विनाशित्वापत्तिरिति भावः ॥ अत्र हेतुः ॥ एको इति ही
ति ॥ एक एवाद्वितीय इत्यादि श्रुत्यो तपत्ति ॥ ननु तथापि लिंग सि६
देहोप्यस्तीति चेन्न देहो लिंगदेहः ॥ सूक्ष्मशरीरमिति यावत्
॥ स वल्लभिः ॥ श्रोत्रादिबुध्यंताभिः स सदशभिरावृत्तेरा
च्छादितस्तेसंघात इत्यर्थः ॥ अत एव लिंगदेहस्य निरवय
स४ वाज्ञाने तत्कारणाज्ञाननिवृत्ति रेव निवृत्तिरन्यथा नि
र्मोक्षप्रसंग इति भावः ॥ एवमात्मवेत्तव्य मोक्षएवसत्यपित
यो रात्मदेहयोः प्रकाशतमसोरिव ते कामेन्तेमप न्य ति ॥
तादात्म्यदयेइत्यर्थः ॥ अतो विपरीतदर्शनात् ॥ परमन्य ॥१०॥

द्ज्ञानं किमस्ति एतद्देवाज्ञानमित्यर्थः । विपर्ययरूपकार्यान्यथोपपत्त्या
तत्कारणं मूलाज्ञानं कल्प्यत इति भावः ॥१७॥ पुनर्वैलक्षण्यमाह ॥ आत्मा
न ३ नियामको नियंता च पुर्बरंतः पंचकोशांतरः देहस्तु नियम्यः सम्बा
ह्यः ॥ तयोरैक्यमित्युत्तरार्द्धव्याख्यातं एवमग्रेपि ज्ञेयं ॥१८॥ अन्य
दपि वैलक्षण्यमाह ॥ आत्मा ज्ञानमयः प्रकाशस्वरूपोऽत एव पूर्णो
शुद्धो देहस्तु मांसादिविकारवान् अत एवाशुचिः ॥ एतेन स्थूलदेहस्या
पि वैलक्षण्यमुक्तं भवति ॥ तयोरैक्यमित्यादि पूर्ववत् ॥१९॥ वैलक्षण्यां
तरमाह ॥ आत्मा स्वयंप्रकाशमानः सन् सूर्यादिवदन्यसर्वप्रकाशकोऽत एव
वस्वच्छः प्रकाश्यगुणदोषसंबंधशून्य इत्यर्थः ॥ असंगो ह्ययं पुरुष इत्यादि श्रु
तेः ॥ देहस्तु तामसो घटादिवत् प्रकाश्यकत्वेन जडः ॥ तयोरैक्यमित्यादि पूर्व

११

वत्॥२०॥ अत्र सर्वत्र पुनरुक्तत्वं नाशंकनीयमात्मनोऽलौकिकत्वेनात्यंतदु
र्बोधत्वादिति। अत एव बहुधा वैलक्षण्यं प्रदर्श्यते। परमकारुणिकैः श्री
मदाचार्यैः आत्मा नित्यो ध्वंसाप्रतियोगी तत्र हेतुः हि यस्मात्सद्रूपः। अ
बाध्यस्वरूपः देहस्तु ध्वंसानुयोगी तत्र हेतुः हि यस्मादसन्मयो मिथ्या वि
कारित्वेन बाधयोग्य इत्यर्थः। यस्मादेवमात्मदेहयोरत्यंतवैलक्षण्यं त
स्मात्तयोरैक्यदर्शनं केवलमज्ञानमिति॥२१॥ ननु आत्मनो प्रकाशत्वं किं नामेत्य
त आह॥ आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनं॥ नाग्न्यादिदीप्तिवद्दीप्तिर्भ
वत्यांध्यं यतो निशि॥२२॥ आत्मनस्तत्प्रकाशत्वं बोधकत्वं किं तदित्यत आह। यत्प दृश्यं३
दार्थावभासनं घटपटादिवस्तुविषयप्रकाशनं इदं तया निर्दिश्यमानविषयद
र्शनमिति यावत्। तर्ह्यग्न्यादिवद्दीपकारित्वादित्यत आह। नाग्न्यादिदीप्तिवद्दि

प्तिरियमात्मदीप्तिरग्न्यादिदीप्तिवन्न कदाचित्तदुत्पत्तिविनाशादिविकारवती
त्यर्थः। तत्र हेतुः। भवत्सांध्यं यतो निष्क्रियतः कारणान्निष्क्रिया त्वौ अग्न्यादिदी
प्त्यामेकस्मिन्नुदेशे सत्यामप्यन्यस्मिन्देशे लोकस्यांध्यं रूपग्रहणाऽक्षमत्वं भ
वति। तस्मादग्न्यादिदीप्तिनामपि दीपिकाऽन्यसाधननिरपेक्षा या दीप्तिः। स
आत्मप्रकाश इति भावः॥१२॥ तदेवं प्रकाशरूपप्रकाशत्वादिलक्षणवैलक्षण्येऽप्यस
त्यपि। आत्मानात्मभेदं दर्शितमुपसंहरन्नुभयोर्भेदं स्पष्टयति। ७। देहोऽहमि
त्ययं मूढो धृत्वा तिष्ठत्यहो जनः। ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा॥१३॥
अहं मम इति प्रत्ययालंबनमियमिदं तया निर्दिश्यमानो घटादिवत्प्रत्यक्षत
या दृश्यमानो देहोऽस्मीत्युभयोर्द्रष्टृदृश्ययोरैक्यं कृत्वा मूढः स्वाज्ञानकार्यवि
पर्ययमोहप्राप्तो जनस्तिष्ठति। इत्थं सत्त्वबुध्यातिमीपारो भवतीत्यर्थः। एतद

होमहमज्ञानमिति भावः। किं कुर्वतापीत्याह। मम ममसंबंधी अयं देह इति सामान्य
ज्ञा
तो भेदं विज्ञाय तत एवाश्चर्यमिति तात्पर्यं। कुड्यवत् सर्वदा घट इवेव यथा सर्वकाले घ
टद्रष्टा पुरुषो ममायं घट इति जानाति। न त्वहं घट इति कदाचिदपि जानाती
त्यर्थः।२३। नन्वेतस्मिंस्तद्बुद्धिरिंद्रियलक्षणभ्रमापरपर्यायमोहकार्यलिं
गानुमेयमज्ञानमीदृक्त्वेनैतन्निवर्तकं किमित्याकांक्षायां तद्विरोधित्वादा
त्मज्ञानमेवात्माज्ञाननिवर्तकमित्यभिप्रेत्य तल्लक्षणमाह। ब्रह्मैवाहमिति पंचभिः।
ब्रह्मैवाहं समः शांतः सच्चिदानंदलक्षणः। नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बु
धैः।२४। अहमहं त्वं प्रत्ययालंबनं प्रत्यगात्मा ब्रह्मैवास्मि। एतयोस्तत्त्वंप
पदार्थयोरैक्यहेतुगर्भितानि विशेषणानि किं लक्षणोहं। समः सत्ताप्रकाशाभ्यां
सर्वाभिन्नः पुनः किं लक्षणः। सच्चिदानंदलक्षणः। सच्चिदानंदैरनृतजडदुः
खप्रतियोगि

भिर्लक्ष्यते। विरुद्धांशत्यागलक्षणा भागलक्षणा या सा यत इति सच्चिदानंदलक्षणः॥
ब्रह्मबोधो हि द्विविधद्वारं विधिनिषेधश्चेति। तत्र सत्यज्ञानादिसाक्षाद्वाचकशब्द
प्रयोगलक्षणो विधिरुक्तः॥ इदानीमतन्निरसनलक्षणो निषेधः प्रदर्श्यते॥
अहमहंशब्दप्रत्ययालंबनं देहो नेत्यन्वयः॥ देहो इत्युपलक्षणं। प्राणेंद्रियाना
मपीहीति विद्वत्प्रसिद्धं। देहादेरनात्मत्वे हेतुमाह॥ असदुपोऽसत्त्वाप्यमन्तमि
त्यर्थः॥ तादृशरूपं स्वस्वरूपं यस्य स तथाविधः। इत्येवंप्रकारमतं ब्रह्मासीत्यादि महा
वाक्यजन्याखंडार्थाकाराबुद्धिर्ज्ञानं बुधैरात्मतत्त्वज्ञैः उच्यते कथ्यते इत्यर्थः॥ एत
द्धि लक्षणं ज्ञानं ज्ञानाभासो हीति भावः॥२४॥ नन्वहं ज्ञातो नष्टः सुखी दुःखी इत्या
द्येनेकविकारत्वेन अहंशब्दप्रत्ययालंबनस्य प्रतीयमानत्वात्स्वरूपं तस्य ब्रह्मत्व
मित्यत आह॥ निर्विकारो निराकारो निरवद्योहमव्ययः॥ना॰ज्ञा॰॥२५॥ अहमहंशा

स्मो ६

१२

द्प्रत्ययालंबनं ॥ प्रत्यगात्मा निर्विकारोऽस्मीति शेषः ॥ निर्गता विरोको जन्मा
द्यो यस्य स तथाविधः ॥ तेषां देह धर्मत्वादिति भावः ॥ तत्र हेतुः निराकारः देहा
धाकार रहितः ॥ अत एव निरवद्यो वा तपितजन्यात्र्याध्यात्मिकादितापत्रयर
हित इत्यर्थः ॥ तत एवाव्ययः अपक्षयादिरहित इत्यर्थः ॥ अहं मनुष्य इत्यादिप्र
तीतेः कथं निर्विकारत्वमिति चेत्साप्रतीतिः शुक्तिरजतादिवद्भ्रान्त्या इत्याह
साहानात मित्यन्तराद्वै व्याख्या तं पूर्वश्लोकैरेव मुत्तरत्रापि ह्येयं ॥ पुनरपि स्वस्य
न प्रति बंधकस्य बुद्धिमोध विपर्ययादेर्व्याख्यातां वनीयापुनः विलक्षणं
ज्ञानमित्यत आह ॥ निरामयो निराभासो निर्विकल्पोऽहमाततः ॥ नाहं दे० इत्या०॥
॥ २६ ॥ अहं निरामयः सर्वरोगरहितः निराभासोऽनित्यव्याप्तेपि फलव्याप्त्या शू
न्यः निर्विकल्पः कल्पनाहीनः ॥ आततश्च व्यापकः ॥ २६ ॥ पु० आह ॥ धनिर्गु

णो निष्क्रियो नित्यो नित्यमुक्तोहमच्युतः ॥ ना० ॥२७॥ अहं निर्गुणो गुणर
हितः गुणानां मायामयत्वादित्यर्थः ॥ अतएव निष्क्रियः क्रियारहितः ॥ तथा
नित्यो विनाशरहितः । अतएव नित्यमुक्तः । कालत्रयेपि बंधशून्यः तत्र हेतुः
अच्युतः अप्रच्युतसच्चिदानंदादिस्वभावः ॥२७॥ पु० आह ॥ निर्मलो नि
श्चलोनंतः शुद्धोहमजरोमरः । ना० शा० ॥२८॥ अहं निर्मलः अविद्यातत्कार्य
लक्षणमलरहितः ॥ अतएव निश्चलः व्यापकत्वादाकाशवन्निष्क्रिय इत्यर्थः ॥
निश्चलत्वे हेतुः ॥ अनंतः देशकालवस्तुपरिच्छेदशून्यः शुद्धः । अशुद्धिरहितः ॥
पुनरजरः जरारहितो ऽमरो मरणरहितश्च । सर्वधर्माणां देहत्रयवर्तित्वादि
ति भावः ॥२८॥ इति श्रीपंकजलोचन आत्मा प्रत्यक्षदेहो न भवति तर्हि शून्यत्वमात्मनः स्या
दित्याशंक्याह ॥ स्वदेहे शोभनं तत्कोसे पुरुषाख्यं च संमतं ॥ किं मूर्ख शून्यमात्मानं देहा

तीतं कुतोपि भो ॥२१॥ भो मुमुक्षे श्रन्यवादिनः स्वदेहे पुरुषाख्यं पुरिशयं मनुष्य
शरीरे उपलिप्तम् अहमाकारेणावसतीति पुरुषः इत्याख्यानामयस्य तं अलक्षण
शोभनमंगलशरीरविलक्षणत्वादिति मंगलं तथा सं मतं रासज्ञानमनंतं
ब्रह्मेत्यादि वेदांतवाक्यैर्वर्णितं चकारादुत्तमः पुरुषस्त्वन्यः इत्यादि स्मृत्या
वर्णितं घटादिवद्देहदृश्यत्वेन देहातीतं आत्मानं सततभावं शांतं सर्वव्यव
हाराधिष्ठानं श्रन्ये स्वपुष्पादिवत्संतापावरूपं किं वदति कथं मन्यसे मामन्यथा
इति भावः ॥ क्वचित्स्वदेहे मिति द्वितीयांतपाठस्तस्मिन्पक्षे देहात्मवादिनं वदति
पं३ उक्तलक्षणं मनुष्यदेहं सत्यासमानमन्यत ॥२१॥ ननु श्रन्यवादिनः एवाभावाप तो न
न्यं मात्सुपरंत्वात्मनो देहातीतत्वे प्रमाणाभावाद्देहएवात्मास्त्वित्याशंक्याह ॥७॥
स्वात्मानं श्रणु मुमुक्षो त्वं श्रसायुत्या चपुरस्य देहातीतं सदाकारं सुदर्दर्शी-

भवादृशैः ॥२०॥ भो मूर्ख देहात्मवादिंश्चार्वाक त्वं स्वात्मानं स्वकीयं आत्मानं पुरुषं
देहातीतं देहातिरिक्तं पश्यसि न कस्माद्धेतोः तस्मात् देहरसमयात् अन्योन्तर आत्मे
त्यादिकया चतुर्नयुक्त्या ॥ एवमस्मिन् कर्तृकर्मविरोधः रसादिरूपया श्रुत्या पश्य
जीव धारय देहातीतं त्वं किमाकार आत्मेत्यत आह सदाकारं अस्तीत्येतन्मात्राबोध
५८
हरकारणं ... आकारो यस्य तं एवंविधो अस्तीति चेत् ... लो न दृश्यते इत्यत
आह ॥ भवादृशैः पश्यसि आचार्यश्रद्धाशून्यैः सुदुर्दर्शं सर्वथा दर्शनायोग्यं तस्मात् दृष्ट
रूपत्वात् देहातिरिक्तं एवेत्यर्थः ॥ यदा पूर्वश्लोके ... द्वितीयपक्षः तदा नस्समा
धानार्थोयं श्लोकः व्याख्यानमिति ॥ २० ॥ तदेवाहमित्यादि सप्तभिः ॥
ध ॥ अहंशब्देन विख्यात एक एव स्थितः परः स्थूलस्त्वनेकतां प्राप्तः
कथं स्याद्देहकः पुमान् ॥ २१ ॥ परः देहान्य आत्मा अहंशब्देन अहंशब्दस्य उपल
क्षणं प्रत्ययस्यापि विख्यातः प्रसिद्धः ॥ ... लक्षण एक एव स्थितो एवे
ति प्रसेयेकमवधारणं ॥ तु शब्दः पूर्वस्मात् वैलक्षण्यद्योतकः तदेवाह ॥

स्थूलोदेहकः देहएवदेहकः स्वार्थे कः प्रत्ययः॥ कथं पुमान्पुरुष आत्मास्या
न्न कथंचिदित्यर्थः॥ देहस्यानात्मत्वे हेतुमाह॥ अनेकतां परस्परभि
न्नतां प्राप्तः॥ एवं लोमः प्रकाशवदिति विलक्षणत्वेपि देहस्यात्मत्वं
कुवन्नालिमूढत्वादुपेक्ष्य इति भावः॥ तदेवाति वैलक्षण्यं दर्शयति
॥ अहं दृष्टतयासिद्धो देहो दृश्यतया स्थितः॥ ममायमिति नि
र्दिष्ट॥ ३१॥ अहं दृष्टतया सिद्धो देहो दृश्यतया स्थितः॥ ममायमिति नि
र्दिष्टः कथं०॥ ३२॥ हे अमहे शाद्रुष्टप्रत्ययालंबनमात्मा सौष्टुतया शाद्रा
दिविषयप्रकाशकतयासिद्धः॥ शाद्रूरूणोमीसादिव्यवहारेणप्रसि
द्धः देहस्तु दृश्यतया शाद्रादिवत्प्रकाश्यतया स्थितः॥ तत्र हेतुः ममा
यं देह इति घटादिवत्स्वसंबंधितया निर्देशाव्यवहारात्॥ एवंउ
भयो वैलक्षण्ये सति कथं देहकः पुमान्स्यादिति व्याख्यानार्थचतुर्थः॥

पादः॥ एवमग्रेपि बोद्धव्यं॥ २१॥ पुनर्वैलक्षण्यं तस्याह॥ घ॥ अहं निर्विकारहि
नस्तु देहो नित्यविकारवान्॥ इति प्रतीयते साक्षात्कु॥ २२॥ अहमिति व्या
ख्यातार्थ॥ जायते॥ अस्ति॥ इत्यादि षड्विकाररहीनः॥ तु वैलक्षण्ये देहो नित्यसार्व
कालेविकारवान्॥ अत्र किं प्रमाणमत आह॥ इति साक्षात्प्रत्यक्षप्रमाणेन
प्रतीयतेऽनुभूयते॥ एवं सति कथं स्यादिति॥ २३॥ एवं युक्त्या देहात्मनो
वैलक्षण्यमुक्त्वा श्रुत्याह॥ घ॥ यस्मात्परमिति श्रुत्या तया पुरुषलक्ष
णं॥ विनिर्णीतं विमूढेन कुत्र॥ २४॥ यस्मात्परं नापरमस्ति किंचि यस्मान्ना
णीयो न ज्यायोस्ति कश्चित्॥ वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पू
र्णं पुरुषेण सर्वमिति तया प्रसिद्धया तैत्तिरीयश्रुत्या सारसौंतेति कूरणोरतो
यापुरुषस्यात्मनो लक्षणं विमूढेन विगतमूढभावेनातिचतुरेणाप्यस
र्थी विविच्य न कुशलेन इत्यर्थः॥ इयं कृतरीत्या चेतीयां विनिर्णीतं॥ विचार्य

स्थापितं॥ अन्यत्पूर्ववत्॥ यद्वाश्न्सेति कर्त्पदमस्मिन्पक्षे विमर्दनेति देहाध्य
वादिनं प्रति संबोधनं विमूढानां इनिःस्वामिन्मुर्खशिरोमणि त्वादेवश्न्ति नेन्द्रि
द्रियाणि भावः॥२४॥ न केवलमनयैव श्न्सा निर्णीतं किं चान्ययापीत्याह॥ च्छ
सेवं पुरुष एवेति सूक्तेपुरुष संज्ञिते॥ अप्युच्यते यतः श्न्सा कू॰॥२५॥ यतो हे
तोः श्न्सा वेदारण्येप व देवतया पुरुष एवेदं सर्वमिति पुरुष संज्ञिते सूक्ते
प्युच्यते पुरुषलक्षणमिति पूर्वश्लोकवदध्याहारः॥ अतः कथं स्यादिति
पूर्ववत्॥२५॥ अपरयापि श्न्स्यैवमेव निर्णीतमित्याह॥ द्व॥७असंगः
पुरुषप्रोक्तो बृहदारण्यकेपि स्फु चा॥ अनंतमलसंश्लिष्टः कू॰॥२६॥
तत्रैवान्यप्रकारेणापि देहात्मनो वैलक्षण्यं निरूपितमित्याह॥
द्व॥ तत्रैव च समाख्यातः स्वयंज्योतिर्हि पुरुषः॥ जजः परम
कात्र्योसौ कू॰॥२७॥ त

रं भ क्ष ५

त्रैव बृहदारण्यक एवेत्यर्थः ॥ अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रु
त्यास्वयंज्योतिःपुरुषः समाख्यातः हीति विद्वत्प्रासाद्धं द्योतयति। असौ घटादि
वत् दृश्यो ऽत एव परप्रकाश्यस्तत एव जडो देहकः कथं पुमान्स्यादिति। व्या
ख्यातं ॥ ३७ ॥ अथास्तामिदं ज्ञानकांडं कर्मकांडेपि देहात्मनो भेद एव वर्णि
त इत्याह ॥ प्रोक्तोपि कर्मकांडे ऽत्यात्मादेहाद्भुलक्षणः ॥ नित्यश्च तत्फलं
भुंक्ते देहपातादनंतरं ॥ ३८ ॥ हि उक्तार्थः कर्मकांडे नापि। यावज्जीवमग्नि
होत्रं जुहुयादित्यादिरूपेण चित्तशोधककर्मप्रतिपादकेन वेदभागे
नेत्यर्थः ॥ आत्मा देहाद्भिन्नलक्षणः प्रोक्तः कथमित्याह ॥ नित्य इति ॥
नित्यः कुत इत्यत आह ॥ देहपातानंतरं तत्फलमनित्यं कर्मफ
लं प्रति आत्मा भुंक्ते ऽतो नित्य इत्यर्थः। चकाराद्न्यायसांख्यादावप्ये
वमेव देहात्मनोर्भेदो वर्णित इति दर्शितं ॥ ३८ ॥ नन्वेवं सति वेदांतिनाम

१६

यैसिद्धांतैःस्यादित्यत आह ॥ ५ ॥ लिंगं चानेकसंयुक्तं चलं दृश्यं विकारि च ॥
अस्यापकमसद्रूपं तत्स्यात्पुमानयं लिंगं लिंगशरीरं तत्परोक्षादिधर्मविशिष्टमयं जीवात्मापरोक्ष इति भावः पुमानयं कं स्यान्न कथंचिदित्यर्थः । चकाराकारणशरीरमपि निराकृतं ॥ अनयोरपि स्वदेवैलक्षण्यरूपमाह ॥ अनेकसंयुक्तं देवमनुष्यादिनानास्थूलशरीरसंबंधां ययद्वा श्रोत्रादिबुद्ध्यंतं सप्तदशकलायुक्तं ॥ तच्चाचलं चंचलं मनःप्रधानत्वादित्यर्थः ॥ पुनर्दृश्यं ममेदं श्रोत्रं ममेदं मनइत्यादिममतास्पदत्वेनात्मनउपसर्जनभूतं च पुनर्विकारि उपचयादिमत् ॥
अव्याप्यकं परिच्छिन्नमसद्रूपं नाम ज्ञानेन बाध्यं च । अत्रेदमाकूतं ॥ यद्यपि लिंगशरीराध्यासे नात्मनः कर्तृत्वभोक्तृत्वादिभावसिद्धिरिति वेदांतिनां न किंचिदप्ययं सिद्धांतोऽन्यवादीयतिमंगलं
॥ ३९ ॥ इदानीं पूर्वोक्तमर्थमुपसंहरति एवं देहद्वयादन्य आत्मा

तर्कितं ३

पुरुषईश्वरः॥ सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः॥४०॥ एवंपू
र्वोक्तप्रकारेण देहद्वयात्स्थूलसूक्ष्मलक्षणादस्मोतिभिन्नआत्मा को
सावित्याह॥ पुरुषः शरीराधिष्ठातातर्हि जीवः नेत्याह। ईश्वरःतत्रहे
तुः। सर्वात्मा तर्हि द्वैतहानिः स्यादित्यत आह। सर्वरूपः एवं सति वि
कारित्वं स्यादित्यत आह सर्वातीतः एतादृशः आत्मा चेदस्ति तर्हि कुतो
नोपलक्ष्यते इत्यत आह। अहंप्रत्ययस्य अहंशब्दप्रत्ययालंबनत्वेन स
र्वदोपलब्धिस्वरूपः इत्यर्थः। तर्हि अहंकारः स्यात्नेत्याह॥ अव्ययः अप
क्षयादिविकारशून्यः अहंकारसाक्षीति भा वः॥४०॥ देहात्मवा
दखंडनं प्रकरणं॥ ननु आत्मानो देहातिरिक्तत्वं प्र तिपादनानर्थमि
ति शंकते॥४१॥ इत्यात्मदेहभागेन प्रपंचस्यैव सत्यता॥ यथोक्तातर्कशास्त्रे
ण ततः किं पुरुषार्थता॥४१॥ इति पूर्वोक्तप्रकारेण वर्णनेन आत्मदेहविभा

५८

गेन प्रपंचस्य सत्त्वेव उक्ता यथा तर्कशास्त्रेण ततः प्रपंचसत्त्वप्रतिपादना
त्किं पुरुषार्थता कुत्सित पुरुषार्थत्वं भयनिवृत्त्यभावादित्यर्थः ॥ द्वितीयार्द्धेन
यं भवतीत्यादिश्रूयते ॥ ४७ ॥ भेदज्ञानस्याभेदज्ञानं प्रति कारणत्वादात्म
देहविभागकथनेनानर्थकमित्याह ॥ इत्यात्मदेहभेदेन देहात्मत्वं नि
वारितं। इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४८ ॥ इति पूर्वोक्तेन
आत्मदेहभागो नात्मनो देहपृथक्करणेन देहस्यैव प्राहुश्चार्वाकमते
नात्मत्वं तन्निवारितं इदानीमुत्तरग्रंथेन तस्य देहभेदस्यासत्त्वमात्म
सत्तातिरिक्तसत्ताराहित्यं स्फुटं स्पष्टं यथा स्यात्तथाहीति प्रसिद्धमुच्यते
॥ ४८ ॥ तदेवाह। चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित्। जीवत्वं च मृ
षा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४९ ॥ चैतन्यस्य सर्ववस्तुभौतिकप्रपंचाधि
ष्ठानप्रकाशस्य घटः प्रकाशते पटः प्रकाशते इत्यादिष्वेकरूपत्वादेकाका
रत्वाद्धेतोः कर्हिचित्कस्यांचिदवस्थायामपि भेदो न युक्तो न य ५८

॥आरंभवादिनोऽन्यस्मादन्यस्योत्पत्तिमर्थिरे॥ अवस्थांतरतापत्तिरे
रेकस्य परिणामितेति॥२

थार्थ इत्यर्थः॥ तर्हि जीवभेदः सत्यः स्यादित्यत आह। जीवत्वं च। चकारो
ऽप्यर्थः॥ मृषा मिथ्या ज्ञेयं तदुपाधेरेवांतःकरणादेर्मायामयत्वादित्यर्थः। अ
धिष्ठानसत्य[illegible]त्वेन कल्पितमिथ्यात्वबोधे दृष्टांतमाह॥ यथा रज्जौ तदज्ञाना
द्धारादिसादृश्येन मंदांधकारे सर्पग्रहणबुद्ध्या हि रज्ज्वुत्पन्नस्य भवति॥ तथै
वात्मान्यज्ञानात्तत्कालसादृश्यादविशेषप्रकाशचिज्जडग्रंथिरूपचिदा
भासभ्रमो भवतीति वेदांतसिद्धांतरहस्यं॥४३॥ इदानीं पूर्वोक्तमेव दृष्टांतं वि
वरणवत्सर्वस्यापि प्रपंचस्य ब्रह्मरूपतामाह॥ रज्ज्वज्ञानाद्भाति नैव यद्वद्रज्जु
रहिः सर्पिणी॥ भातीति तद्विवृतिसादृश्यादिस्वाकारेण केवला॥४४॥ केवलेति वि
शेषणेन पूर्वावस्थामपरित्यज्यावस्थांतरप्राप्तिलक्षणविवर्तोपादानत्वं मे
वोक्तं॥ नारंभोपादानेनैवं नैव परिणामोपादानेनैवमिति बोद्धव्यं॥ अन्यस्य
[illegible]॥४८॥ अत्र हेतुः [illegible] नैव मूलोपसंहरति॥४९॥ उपादानं प्रपंचस्य ब्रह्म
[illegible]॥४५॥ यस्माद्
नोऽन्यन्न विद्यते तस्मात्सर्वः प्रपंचोऽयं ब्रह्मैवास्ति न चेतरत्॥४५॥ यस्माद्ब्र

पंचस्य आकाशादिदेहांतस्य जगद्भ्रमाधारस्य ब्रह्मणो मायाशबलाद्वैत
न्याद्यन्यत्परमात्मा यद्यप्रकृतिरूपादानं कारणविशेषो न विद्यत इति ॥ तस्मा
द॰ एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः ॥ तस्माद्धेतोरिन्साद्धिस्यष्ट
मन्यत् ॥४५॥ ननु व्याप्यव्यापकता रूपेभेदेजायते सति कथं प्रपंचस्य ब्रह्म
ते साक्षं कथमाह ॥ ४६ व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ॥ इति
ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥४६॥ व्याप्यमंतरं व्यापकं बाह्यं तयोर्भा
वो मिथ्या घटाकाशादिवत्कल्पितत्वादसत्त्वमित्यर्थः तत्र प्रमाणमाह ॥ इदं
ब्रह्मेदं क्षेत्रमिति प्रकृतेदं सर्वं यदयमात्मेत्यादिश्रुतिरूपेश्वरात्ता बला
दित्यर्थः ॥ ततः किमत आह ॥ इति ज्ञाते इत्यादि सुगमं ॥४८॥ ननु भेदसत्त्वेन
प्रकाशमानो व्याप्यव्यापकभावः कथं मिथ्येत्याशंक्याह ॥ श्रुत्यानिवारितं
न नानात्वं स्वमुखेन हि ॥ कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥४७॥
नेनामितिनिष्क्रियेहीतिप्रसिद्धौ श्रुत्या नेह नानास्ति किंचनेत्यादिरूपया स्वर्थः

नानात्वं निवारितं तेन च नानात्वनिवारणे नाद्वयकारणेऽभिन्ननिमि
त्तोपादाने ब्रह्मणि स्थिते सति भासो व्याप्यव्यापकादिप्रतिभासः। कार्यभूतो
न्यः। स्वकारणातिरिक्तः कथं भवेन्न कथंचिदित्यर्थः॥ किंच भेददृष्टेर्दोषश्रवणा॥४७॥
दपि कारणादभिन्नमेव कार्यमित्याह॥ दोषोपि विहितः श्रुत्या मृत्योर्मृत्युं स
गच्छति। इह पश्यति नानात्वं मायया वंचितो नरः॥४८॥ मृत्योः स मृत्युमाप्नोति
य इह नानेव पश्यतीति श्रुत्या श्रुत्या सार्थः॥ तत्र मृत्योरनंतरं मृत्युं जन्ममर
त रणपरंपरामित्यर्थः। स्वप्नमनर्थं दृष्टिं कुर्यादित्यत आह॥ ब्रह्मणः सर्व॥४८॥
भूतानि जायंते परमात्मनः॥ तस्मादेतान्यब्रह्मैव भवंतीत्येवं धारयेत्॥
॥४९॥ ब्रह्मणोऽपरिच्छिन्नात्परमात्मनः जायंते उत्पद्यंते॥ स्थि
तिप्रलययोरुपलक्षणं॥ यतो वा इमानि भूतानि जायंते इत्यादिश्रुतेः।
यस्मादेवं तस्माद्धेतोरेतानि भूतानि ब्रह्मैव भवंति॥ समस्तत्र ब्रह्म
रूपाणीत्येवं धारयेन्निश्चिनुयादिति॥४९॥ ननु नामरूपके ना

मिभेदेन विचित्राणि भान्ति कथमेकब्रह्मात्मकानां सारं त्वयाह ॥
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ॥ कर्माण्यपि समस्ता
नि बिभर्तीति श्रुतिर्जगौ ॥५०॥ त्रयं वा इदं नाम रूप कर्मेति बृह
दारण्यकश्रुतिर्जगौ गायति तस्माद्धि कारणः भावयामासेत्य
र्थः ॥ इति स्विमतमाह। ब्रह्मैव सर्वनामान्याकाशादिदेहांतान्संज्ञाविशे
षान् ॥ च पुनर्विविधानि रूपाण्याकाशादिद्विपदांतान् नाना
कारविशेषानपि शब्दार्थे समस्तानि कर्माण्याकाशप्रदानादि
स्नान[illegible]चांतान् क्रियाविशेषान् बिभर्ति। रज्ज्वादिकमिव सर्पादि
प्रतिभासाधिष्ठानदर्शन[illegible]स्याप्रतीतिं दर्शयति इत्यर्थः ॥५०॥ अत्र लो
कप्रसिद्धदृष्टांतमाह ॥ सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतं ॥ ब्राह्मणो जायमानस्य

ब्रह्मत्वं च तथा भवेत् ॥ ५१ ॥ सुगमं ॥ एवं कृतक्रमादधिकारवैषम्यस्याप्येकाधिष्ठानरूपत्वसिद्धेः प्रे
ददर्शिनः भयमाह ॥ ५२ ॥ स्वल्पमप्यंतरं कृत्वा जीवात्मपरमात्मनोः ॥ यः संतिष्ठति मूढात्मा भ
यं तस्याभिभाषितं ॥ ५३ ॥ स्वल्पमप्यंतरमुपास्योपासकरूपभेदं कृत्वा कल्पयित्वा ॥ तस्य
भयमभिभाषितं यद्वा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते इत्यादिश्रुत्येत्यर्थः ॥ ५४ ॥ ननु प्रकाश
तमसोरिव परस्परं विरुद्धस्वभावयोः द्वैताद्वैतयोः ॥ कुत एकत्र रागत्वमित्याशंक्यावस्थाभेद
दित्याह ॥ ५५ ॥ यत्राज्ञानाद्भवेद्द्वैतमितरस्तत्र पश्यति ॥ आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥
५६ ॥ यत्र यस्यामज्ञानावस्थायां द्वैतमिव भवेत्तत्र तस्यामज्ञानावस्थायामितरस्त्वन्यः प
श्यति रूपग्रहणं गंधादिग्रहणस्याप्युपलक्षणं चशब्दः पूर्वोक्तवैलक्षण्यं सूचयति ॥ य
दा यस्मिन् ज्ञानकाले सर्वमात्मत्वेन भवेत्तत्र तस्मिन् ज्ञानकाले इतरस्त्वितरत् किंचिदप्यन्यन्न पश्य
ति ॥ सर्वैः कार्यज्ञाननिवृत्तिरिति भावः ॥ ५७ ॥ ननु द्वैतादर्शने कः पुरुषार्थ इत्याशंक्याऽ

(२०)

तिमर्थतः पठति ॥ ५३ ॥ यस्मिन्सर्वाणि भूतानि ह्यात्मत्वेन विजानतः ॥ नैवैतस्य भवेन्मो
हो न च शोको ऽद्वितीयतः ॥ ५४ ॥ यस्मिन्नवस्थाविशेषे सर्वाणि भूतान्यात्मत्वेनात्मभावेन
विजानतः ॥ अपरोक्षत्वेन साक्षात्कृतवतो ऽधिकारिणः ॥ पुरुषस्य तस्येति षष्ठी सप्तम्य
र्थे तस्मिन्नवस्थाविशेषे वै निश्चयेन मोहो भ्रमो न भवेच्च पुनः ॥ शोको व्याकुलतापि
न भवेत् उभयत्र हेतुः ॥ अद्वितीयतः तदाकारेणाभावादित्यर्थः ॥ ५४ ॥ शोककारणा
भावं प्रमाणमाह ॥ अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ॥ इति निर्धारितं श्रुत्या
बृहदारण्यसंस्थया ॥ ५५ ॥ स वा अयमात्मा ब्रह्म विज्ञानमय इत्यादिरूपयेत्यर्थः ॥ श्लो
कं स्पष्टं ॥ ५६ ॥ ननु अस्मिन् लोके तत्कारणे सति कथं शोकाद्यभाव उच्यत इत्याशंक्य
सदृष्टांतमाह ॥ ५७ ॥ अनुभूतोप्ययं लोको व्यवहारक्षमोपि सन् ॥ असद्रूपो यथा स्व

मउत्तरक्षणे बाधतः ॥ ५६ ॥ स्पष्टं ॥ दृष्टांतं विरचय्यानुक्तन्यायमन्यत्राप्यतिदिशति ॥ ५७ ॥
स्वप्नो जागरणेऽलीकः स्वप्नेऽपि जागरो न हि ॥ द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥
५७ ॥ अलीको मिथ्या द्वयं स्वप्नजागरणे लये सुषुप्तौ शेषं स्पष्टं ॥ ५७ ॥ उक्तमुपसं
हरन्फलितमाह ॥ ५८ ॥ त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितं ॥ अस्य द्रष्टा गुणा
तीतो नित्यो ह्येकश्चिदात्मकः ॥ ५८ ॥ त्रयं जाग्रदाद्यवस्थात्रयमेव मुक्तं परस्परं व्य
भिचारेण मिथ्या मिथ्यात्वे हेतुः ॥ गुणत्रयविनिर्मितं मायाकल्पितमित्यर्थः ॥ तर्हि
कस्य सत्यत्वमिति पृच्छति अवस्थात्रयातीतस्येति शेषं स्पष्टं ॥ ५८ ॥ नन्ववस्था
त्रय मिथ्या भवतु जीवस्तु सत्य इत्यतः सदृष्टांतमाह ॥ यद्वन्मृदि घटभ्रांतिः शुक्तौ

वारजतस्थितिः॥ तद्वद्ब्रह्मणि जीवत्वं वीक्ष्यमाणे न पश्यति॥५९॥ ब्रह्मणि वीक्ष्यमाणे आत्मत्वेन साक्षात्कृते सति॥ जीवत्वं न पश्यतीत्यन्वयः॥ दृष्टांतस्तु स्फष्ट एव॥५९॥ अज्ञानावस्थायां प्रतीयमानो यो जीवब्रह्मभेदः स नाममात्र इति बहु दृष्टांतैराह॥६०॥ यथा मृदि घटो नाम कनके कुंडलाभिधा॥ शुक्तौ हि रजतख्याति जीवशब्दस्तथा परे॥६०॥ रजते तत्र ख्यातिर्नामैवेति यावत्॥ परे परब्रह्मणि सुगमम न्यत्॥६०॥ न केवलं जीव एव नाममात्रं किंतु सर्वं विश्वमपि ब्रह्मणि नाममात्रमित्यनेक दृष्टांतैराह॥६१॥ यथैव व्योम्नि नीलत्वं यथा नीलं मरुस्थले॥ पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि॥६१॥ स्पष्टं॥ नाममात्रप्रपंचद्वयमिथ्यात्वं वासनादार्ढ्याय ममेवार्थे॥ बहुभिः श्लोकदृष्टांतैः प्रपंचयति॥ यथैव शून्ये वेतालो गंधर्वाणां पुरं यथा॥६२॥ यथैव शून्ये वेतालो गंधर्वाणां पुरं यथा॥ य

ब्र ५

१ आत्मबोधटीका

॥२२॥

ससे जगत्स्थितिः ॥ मूलं यो निर्जने देशे वेताळोऽकस्मादाभासमा
नो भूत्वा विशेषः ॥ गंधर्वपुरस्यापि शून्याधिष्ठानत्वं ह्येयं ॥ गंध
र्वनगरं नाम राजनगराकारेणेलक्षितादि मध्य चेनो विशेषः ॥
अन्यत्सुगमं ॥ ६५ ॥ ननु ब्रह्मणि आभासमानो प्रपंचो न भूयादि ॥ स्ये
हं क्यवा सन्नाभेदेनो भयमपिनास तेइति सद्दृष्टांतमाह ॥ ६६ ॥ सु
वर्णासाविसुद्धोस्ति यनुद्रोनाति वै सदा ॥ यथैवाद्वितीयोऽरज्जुरहि
तिनो ह्यानना निरूपं ॥ ६७ ॥ तत्र ह्रानिनः सदैवाभासाविसुद्धोऽह्यानत
कार्यमत्तरहितत्वात्प्रपंचोस्ति । अह्रानिनस्तु सदैवाशुद्धो अस्ति
वैहीति तत्वासिद्धो ॥ ३ अयंत्रापि दृष्टांतः स्पष्टः ॥ तत्र ह्रानिनो निर्वि
षयत्वेनानयंवेसी अह्रानिनस्तु तद्रूपसीत्वेन सार्थरूपयुक्तितद्भा
अयं भावः ॥ ब्रह्मणि प्रपंचस्य यथाकाशत्वेन सदा नास्ति वा तथापि ह्यसा
रूपत्वेन पुरुषार्थोपयोगीति ह्रानिनं प्रतिभाति नाह्रानिनं ॥ यथा
सूर्यदीपादीं चक्षुष्मद्भावित्वाद्दृष्टा ॥ ६८ ॥ नन्वाभासापि सदैवानिष्प्रं
पंचत्वेन भाति । तर्हि किमर्थं देहात्मसमेदो वार्षा ताः दृसां क्या विवेकि

त५

२२

नोदेहव्यतिरिक्तबोधनार्थं विवेकेनस्तु यथैवेतिसदृष्टांतमा
ह॥६७॥ यथैव मन्मयं कुंभस्तद्वद्देहोपिचिन्मयः॥आत्मानात्मविभा
गोयं मुधैव क्रियते बुधैः॥६८॥ तत्रबुधैरेवकौरकारप्रश्ले(?)षमु
धैव क्रियते अपितु नेति। काकुव्याख्यानं॥अन्यत्सर्वं सुगमं॥६९॥
इदानीमविवेकिनः कल्पितदेहतादात्म्यं सदृष्टांतमाह॥सर्पत्वेन
रज्जुं पंचभिः॥इति निराम प्रकाशप्रकरणम्(?)॥सर्पत्वेन यथा र
रज्जुं तत्वेन शुक्तिका॥विनिर्णीता विमूढेन देहत्वेन तथात्मता॥७१॥
घटत्वेन यथा पृथ्वी
कनकं कुंडलत्वेन तरंगत्वेन वैजलं॥वि०॥७२॥पटत्वेनैव तंतवः॥वि०॥७३॥पुरुषत्वेन वै स्थाणुर्जलत्वेन मरीचि
का॥वि०॥७४॥गृहत्वेनैव काष्ठानि खड्गत्वेनैव लोहता॥वि०॥७५॥ एतेषा
पंचानां मध्ये श्लोकानामर्थः स्फुटतर एवास्तिन व्याख्यायते॥ अन्य॥
यथावृक्ष
धानि पर्याये किंकार प्राणिता बेदर्शनमेवेति सदृष्टांतमाह॥यथावृक्ष न३
विपर्यासो जलाद्भवति कस्य
चित्॥तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः॥७७॥पोतेन गच्छतः

पुंसः सर्वं भाति विचंचलं ॥ त॰ ॥७१॥ तत्र पोतेन नौकायां स्पष्टमन्यत् ॥७२॥
पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित् ॥ त॰ ॥७२॥ चक्षुर्भ्यां भ्रम
शीलाभ्यां सर्वं भाति भ्रमात्मकं ॥ त॰ ॥७३॥ अलातभ्रमणेनैव वर्तु
लं भाति सूर्यवत् ॥ त॰ ॥७४॥ महत्वे सर्ववस्तूनामणुत्वं ह्यतिदू
रतः ॥ त॰ ॥७५॥ हीति सर्वं लोकप्रसिद्धौ अतएवापश्यते षपाहुपरे
ष्यते ॥७६॥ सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः ॥ त॰ ॥७६॥
काचभूमौ जलत्वं वा जलभूमौ हि काचता ॥ [illegible] ॥७७॥ यद्वदग्नौ म त॰
णित्वं हि मणौ वा वह्निता पुमान् ॥ त॰ ॥७८॥ यथैव दिग्विपर्यासो मो
हाद्भवति कस्यचित् ॥ त॰ ॥७९॥ अभ्रेषु सत्सु धावत्सु सो धाम वै[illegible] नोदन्विद
भाति वै ॥ त॰ ॥८०॥ यथा शशी जले भाति चंचलत्वेन कस्यचित् ॥ त॰
शशी सुपलक्षणार्थः सूर्यादिः ॥ नन्वेतस्य निवृत्तिः कुतो न वेदिति
॥८१॥ चेदात्मज्ञानाल्लीयते च परमात्मनि देवेसाहोन्तराधेन ॥८२॥ एव
मात्मन्यविद्यातो देहाध्यासो हि जायते ॥ स एवात्मपरिज्ञानाल्ली
यते च परमा[illegible]नि ॥८३॥ स एव देहाध्यास आत्मपरिज्ञानाद्ब्रह्मासे

२३

क्यसाक्षात्कारात् पः सम्यग्ज्ञानतत्कार्यरहिते प्रत्यगात्मनि ब्रह्मणि
लीयते ब्रह्मस्वरूपेणावतिष्ठते। अधिष्ठानं विना रोपितस्य त
स्य स्वरूपमस्ति चेत्कारादध्यासकारणमज्ञानमपि लीयत इति॥ अ
न्यथाध्यासलयाभावादित्यर्थः॥ न हि कारणे सति कार्यस्य लयः सं
भवति॥ तस्मात्तत्त्वज्ञानादेव सकारणकार्याध्यासनिवृत्तिरित्युक्तं सर्वप्रपंचि
तेन॥ ८२॥ एतदेव विवृणोति॥ छ॥ सर्वं मायामात्तया जातं जगत्स्थावरजंगमं॥ अ
भावात्सर्वज्ञानाद्देहस्य चास्ता कुतः॥ ८३॥ इति अन्योन्याध्यासप्रकरणं॥
नास्तीदेहस्येत्यर्थः॥ स्पष्टमन्यत्॥ ननु ज्ञानिनो नः प्रपंचोऽसत्तयावस्था
ने तर्हि ममापि कस्योऽयं भोजनं नान्यस्येति आरलिचेदत्र आह॥ छ॥ आत्मा
नं सततं ज्ञानेनकालेन परमात्मतः। प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुमर्हसि॥ ८४॥
भो महामते कामादिपराभवेन स्वाकृतसाधनोऽनुखेत्तमात्मानं सततं सुष्टिम
लिपर्यंतं ज्ञानत्वेपालवास्येः विचारयन् स्वकालेनयातिक्रम स्वविचार
साध्यज्ञानानंतरं चाखिलं प्रारब्धं चरमदेहारंभकं कर्म भुंजन् सुखदुःखाभ्या
पुःखोभा

सानुभवेन क्षपयन्सन्नुद्वेगं कर्तुं नार्हसीति ॥८५॥ वस्तुतस्तु प्रारब्धमेव नास्ति कुतो भोगः कुतस्तज्जो भोगोद्वेगकारणं कुतस्तथा तन्निषेधोपदेश इति वेदांत रहस्यं वक्तुं प्रतिजानीत आचार्यः ॥८६॥ उत्पन्नेप्यात्मविज्ञाने प्रारब्धं नैव मुंचति ॥ इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेधुना ॥८५॥ अत्रेयं प्रक्रिया जगत्प्रतीतिस्त्रिधा लौकिकी शास्त्रीया अनुभविकी चेति। तत्र धापारमार्थिकी द्वितीया व्यावहारिकी तृतीया तु प्रातिभासिकी तासां निवृत्तिस्तु क्रमाद्वेदांतश्रवणादित्रय साक्षात्कार प्रारब्धक्षयैर्भवति नान्यथेति। तत्रेयं प्रतिज्ञा तत्प्रतीत्यभिप्रायेण प्रतिज्ञातव्यं श्लोकार्थस्तु स्पष्ट एव ॥८५॥ तदेवाह ॥८६॥ तत्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ॥ देहादीनां असत्वात्तु यथा स्वप्नो विबोधितः ॥८६॥ ज्ञानेन सर्वव्यवहारकारणाज्ञाननिवृत्तेः प्रारब्धाभाव इति श्लोकभावार्थः ॥ पदार्थस्तु स्पष्ट एव ॥८६॥ इदानीं प्रारब्धग्राहकस्य त्वाद्यन्नुक्रमं कुर्वन्नेकं पक्षं स्मरति ॥८६॥ कर्मजन्मांतरीयं यत्प्रारब्धमिति कीर्तितं ॥ तत्तु जन्मां

तराभावात्पुंसो नैवास्ति कर्हिचित्॥८७॥ तत्र कर्म त्रिविधं॥ संचित क्रियमाण प्रार
ब्धभेदात्॥ तन्मध्ये भाविदेहारंभकं संचितं॥ तथा वर्त्तमानदेहनिर्वर्त्यं॥ क्रि
यमाणं॥ प्रारब्धं तु वर्त्तमानदेहारंभकं॥ तत्रयद्यपि संचितं जन्मांतरीयमेव तथापि
भाविदेहतस्यौ प्रारब्धत्वमेव भवति॥ तेनेदं सिद्धमात्मनः। स्वतः कर्तृत्वाभावात्कालत्र
येपि जन्म नास्तीति सर्वमवदात् शुद्धं तं॥८७॥ पूर्वोक्तदृष्टांतं विवृण्वन्सकारण
जन्माभावे युक्तिमाह॥छ॥ स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहिकः॥ अध्यस्तस्य
कुतो जन्म जन्माभावे पि तत्कुतः॥८८॥ स्पष्टं॥ ननु देहादि प्रपंचस्य यतो वा इमानि

पि

भूतानीति श्रुतेः॥ सत्सब्रह्मकार्यत्वात्कथं प्रतिभासत्वमिति चेदुच्यते॥छ॥ उपादानं
प्रपंचस्य मृद्भांडस्येव पठ्यते॥ अज्ञानं चेति वेदांतैस्तस्मिन्नष्टे क्व विश्वता॥८९॥ कारणं
द्विविधं निमित्तोपादानभेदात्॥ तत्र निमित्तं नाम सत्तिमात्रकारणं॥ उपादानं तु सत्ति
स्थितिलयकारणं तत्र वेदांतैः मायां तु प्रकृतिं विद्यादित्यादिभिः प्रपंचस्योपादानमज्ञा

नपद्यते॥ चकाराद्ब्रह्मापि अत्रायं भावः॥ न केवलं ब्रह्मैव जगत्कारणं निर्विकार
त्वात्॥ नापि केवलमज्ञानं जडत्वात् तस्मादुभयं मीलितत्वेन जगत्कारणं
भवतीति॥ सयान्तस्तं मिथुनीकरोतीत्यादिश्रुतेः॥ तत्र दृष्टांतमाह॥ पिंडस्य
घटकरकादेः मृदिव मृत्पिंड इव॥ तत्र जलस्थाने ब्रह्म पिंडकरणसामर्थ्यसाम्यात्॥
अज्ञानं तु मृत्तिकास्थाने आवरकत्वसाम्यात्॥ तत्र ब्रह्मणोऽविनाशित्वाद्
अज्ञानं तु मृत्तिकास्थाने आवरकत्वसाम्यात्॥ तत्र ब्रह्मणोऽविनाशित्वाद् भ्र
न्मज्ञानेन तस्मिन्नज्ञान एव नष्टे सति विश्वता जीव जगदीश्वरात्मक जगद्भावः॥ इत्यन
काप्यस्तीत्यर्थः॥ ८९॥ मिथुनीभावस्यैव जगत्कारणतां स दृष्टांतेन प्रपंचयति॥ ९॥
यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्॥ तद्वत्सत्यमविज्ञाय जगत्पश्यति
मूढधीः॥ ९०॥ सुगमं॥ इदानीं यदुक्तं तस्मिन्नष्टे सति क्व विश्वतेति तत्स्व
यम्पूर्वोक्तं प्रारब्धाभावं स दृष्टांतमुपसंहरति सार्द्धेन॥ ९॥ रज्जुरूपे परिज्ञाते सर्प
खंडं न तिष्ठति॥ अधिष्ठाने तथा ज्ञाते प्रपंचे शून्यतां गते॥ ९१॥ देहस्यापि
प्रपंचत्वा

ह्यारब्धावस्थितिः कुतः एतस्याप्युत्तानार्थः ॥ ननु जीवन्मुक्त्यन्यथानुपपत्त्याऽत्र
भस्मसमश्नुत इत्यादिश्रुतिः प्रारब्धांकमर्थं वक्तीति चेदुच्यतेऽर्द्धेन ॥ छ ॥ अ
ज्ञानजन्मबोधा[illegible]र्थं प्रारब्धं वक्ति वै श्रुतिः ॥ ४१ ॥ ज्ञानेन सर्वव्यवहारकारणेऽज्ञा
नेन नष्टे सति ज्ञानिनः कथं व्यवहार इत्यज्ञानिभिराक्षिप्ते प्रारब्धमिति तद्बोधा
र्थमिति शेषं स्पष्टं ॥ ४२ ॥ किं तत्त्वज्ञानिबोधार्थं श्रुतिर्वक्तीति चेदुच्यते ॥ छ ॥
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ बहुत्वं तन्निषेधार्थं श्रुत्या गीतं तु
यत्स्फुटं ॥ ४३ ॥ भिद्यते हृदयग्रन्थिरित्यादिश्रुत्या कर्माणीति बहुत्वं यत्स्फुटं गीतं
तन्निषेधार्थं प्रारब्धोऽध्यौवप्रतिपादनार्थं अन्यथा संचितक्रियमाणापेक्षया
कर्मणी इति द्वित्वमगास्यात् ॥ इत्येतद्रूपात्मसाक्षात्काराच्चिज्जडग्रन्थिछे
दः संचितक्रियमाणप्रारब्धाख्यत्रिविधकर्मक्षयात्परमपुरुषार्थोऽज्ञानि
बोधनार्थं श्रुतिर्वक्तीति भावः ॥ ४४ ॥ उक्तमेव परिस्बोधकमाह ॥ छ ॥ उच्यतेऽज्ञै

चा

वैलक्षण्ये तत्तदानर्थद्वयागमः वेदांतमततानं च यतोऽस्मान्मितिश्रुतिः ॥ १४ ॥

न२ एतत्सारब्धमसेः श्रुतितात्पर्यानिसेः बलादविवेकसामर्थ्याच्चोद्दृच्यते ॥
यथार्थतया प्रतिपाद्यते । चकारान्नत्रस्यतीति तदैवं नर्थद्वयागमो दोषद्वय
प्राप्तिः । तत्र निर्मोक्षप्रसंग एको दोषः । द्वितीयस्तु शास्त्रसंप्रदायोच्छेद
इति । न केवलमेतद्दोषद्वयप्राप्तिरपितु वेदांतमततानंद्वैतयाथार्थ्या
दित्यर्थः । तर्हि किं प्रतिपत्तव्यमत आह । यस्याः सा श्रोशोऽज्ञानं भवती
ति यादृशी श्रुतिः ॥ तादृशोऽश्रुत्यर्थो गम्याद्यपि शेषः । बृहदारण्ये तमेव धी
रो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लाप
नं हि तदित्यादि । एतदभिप्रायः क इति चेदुच्यते ॥ धीरो विवेकी
रा१ ब्राह्मणोऽन्विदितुमिषुस्तमेव वेदांतप्रसिद्धमात्मानं विज्ञायाऽदोप

२८

मतोऽज्ञातयाऽनंतरं ...म परोक्षानुभव पर्यंतं वेदांत वाक्य विचारं
इति बहुकर्मोपासन प्रतिपादकानुशब्दो वाक्य संदर्भान्नानु
ध्यायाद्व चिंतयेत् ॥ न हि तान् बहून् ध्यायात् किं त्याह । वाचो विग्लापनं ग्ला
निं करोति तत् हेतत् शास्त्र पठने ... इति सर्वानुभवसिद्धमित्यलं पल्लवि
तेन ॥ ६४ ॥ इति जीवन्मुक्ति प्रकरणं ॥ तदेवं ... तावतो ग्रंथ संदर्भेन मुख्या
धिकारिणो वैराग्यादि साधन चतुष्टय संपन्नस्य वेदांत विचार एव प्रत्य
गभिन्न ब्रह्मापरोक्ष ज्ञान द्वारा मुख्य मोक्षकारणमित्युक्तमिदानीं
मंदबुद्धि चार्यापि बुद्धिमांद्य विषयासक्त्यादि प्रतिबंधेन परोक्षतो ...
नेयस्य न जायते तस्य मंदाधिकारिणो निर्गुणब्रह्मोपासनमेव
मुख्य साधनमित्यभिप्रेत्य ससाधनं ध्यानयोगं प्रतिजानीते आ
चार्यः ॥ ६५ ॥ त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये ॥ तैश्च

७ हीतिवेदांतप्रसिद्धो

सर्वैः सदाचार्यं निदिध्यासनमेव तेते ॥१५॥ अथ शब्दो ऽधिकारभे दार्थः
बुद्धि दल इति पाठस्तत्र स्निग्धयतो मंदाधिकारी विचारे न लभेत ॥ ततो हरि तु
स्यार्थः ॥ त्रिपंचत्रिगुणित इति पंचपंचदश इत्यर्थः ॥ अनेनाध्यागयोगागतिपा
दकपातेन लभवैराग्यवादृशेषिनादिवदेनाद्यमिति ध्वनितं तत संख्या
का निजंगानि निदिध्यासनांगानि साधनविशेषान् मया ज्ञातिवदित्य
र्थः ॥ लक्षेति। निदिध्यासनप्रतिज्ञानप्रयोजनमाह ॥ एवं चेतस्य
१८ स्वरूपोस्थानलक्षणास्य मोक्षस्य सिद्धयर्थिति ॥ सुगममन्यत्तत् ॥
॥१५॥ मंदाधिकारि ऽन्यत्रावेवमेसगुणोपासनविचाररूप
साधनं विहाय श्रद्धयाऽऽचार्योक्तप्रकारेण निर्गुणब्रह्मैव निदिध्यासेदि
त्याह ॥ नित्याभ्यासादृते प्राप्तिर्न भवेत् सच्चिदात्मनः ॥ तस्माद्ब्रह्म निदि
ध्यासेज्जिज्ञासुः श्रेयसे चिरं ॥१६॥ स्पष्टार्थः ॥१६॥ ननु आधिकारि नान्यं गा
नियैः सत निदिध्यासनेन कर्तव्यमित्यपेक्षायां तत्रास्तु हिरण्यवीय

27

इत्यर्थः ।।१६ ६२

।।२८

यमइङ्गः ... ।।१६।। यमो नियमस्तथा गोमौनं देहः श्वाद्वालता ।। आसनं
तलवेश्वदेहः सास्म्यंचे ... ।।१७।। प्राणसंयमनं चैव प्रत्याहारश्च धा
रणा ।। आत्मध्यानं समाधिश्च प्रोक्तान्यंगानि वै क्रमात् ।।१८।। एतानाथीबु
भार्वैपि श्लोकै ।।१९।। इदानीमेतेषां प्रत्येकमुद्देशक्रमेण स्वामिमतानि लक्ष
णान्याह ।। सर्वेषामित्यादेर्विद्धातिमि ।। श्वासवेन्त इति विलानादिंदी
यग्रामस्यमः ।। यमो यामिति संप्रोक्तः श्यसनीयोमुहुर्मुहुः ।।२०।। सर्व
मात्मानां हिंदेहान्तं जगत्स्वबीज्यासमानाधिवरत्य्यदोराश्यात्पु
रः षादिवैइति विलानान्निश्चयादतोरिद्वियालोश्लाद्योदीनामवादश
करणानां ग्रामस्समूहस्तस्य संयमः ।। सम्यक्शब्दादि विषयाणांवि
नाशीलेसातिरायत्वादिदोषदर्शनमित्यर्थः ।। यमो विषयेभ्यो निवारणं अयंय ।।२८
मइतिसंप्रोक्तः ।। न तु केवलमहिंसादिरित्यर्थः ।। लतश्चविमलआह ।। अयं
मैमुहुर्मुहुरभ्यसनीयइति ।।१९।। इमं यमं ... यिता नियमं लक्षयति ।।धौ।। सजातीयप्र
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।। नियमो हि परानंदो नियमात्क्रियते बुधैः

का०२ ते०४ ती०२

त्यगभिन्नं ब्रह्म न देकाकारो दृत्तिप्रवाहः ॥ चकाराद्विजातीयनि[illegible]र्विजातीयं ब्रह्मतद्वि
लक्षणजगत्स्वंसंस्काराज्ज्ञायमानं तदाकार दृत्तिरित्यर्थः ॥ तस्य निरस्तातिदोषिदृश्या
पिरुपेक्षा ऽनादरः अयं नियमस्यार्थः ॥ न तु केवलं शौचादिः हीनिउपनिषत्प्रसिद्धो ॥
नन्वनयोरुपनिषत्प्रसिध्याकः पुरुषार्थ इति चेत्तदाह । परानंद इति तत्स्वफिमत आह ॥
नियमादित्यादिसुगमं ॥१०७॥ इदानीं तृतीयत्यागं लक्षयति ॥ ध्यास्यागः प्रपंचरूप
स्य चिदात्मत्वावलोकनात् । त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥१०९॥ प्रपंचस्व
पस्य प्रपंचो नाम रूपलक्षणो रूपत्वेनोपयेयं पटोयमित्यादिना रूप्यते निरूप्यते[illegible] ते०४
वद्भियते प्रकाश्यत इत्यर्थः ॥ येन तत्प्रपंचरूपं सर्वाधिष्ठानभूतं पदार्थस्फुरणं तच्चिदा
त्मत्वावलोकनात् ॥ [illegible] स्वत एव प्रकाशमानं ब्रह्म तदात्मत्वं स्वस्वरूपं यस्य तद्भावस्या
वलो[illegible] मनुसंधानं तस्माद्भेदात् स्यागः उपेक्षा स एव त्यागः त्यागशब्दवाच्यः ॥

28

॥२९॥

२ गवास्यमित्यादिश्लोकेनः॥ होतिविद्वदनुभवप्रसिद्धो। नन्वयं संयोगो नकुत्रापिप्रसिद्ध

इत्याशंक्याह॥ महतांप्रकृष्टपरलि। तत्रहेतुः। मतोहेतोरयंसयोगः॥ सद्योऽनुसंधानकालए

वमोक्षमयः॥ परमानंदस्वस्वरूपावस्थानरूपः॥ अतएवबालतत्वविदामिष्टत्वादितिप्र

सिद्धोयंसयोगइत्यर्थः॥ तस्मादयमेवमुमुक्षुणाकर्त्तव्योनान्यः। केवलंस्यकर्माकरणस्य स्था

प्यु५ परस्तिभाव॥ एवमयंयुक्तो॥१००॥ अथमोनंलक्षयति॥ ७॥ यस्माद्वाचानिवर्त्तंतेऽप्रा

ति५ प्यमनसासह॥ यन्मौनंयोगिभिर्गम्यंतद्भजेत्सर्वदाबुधः॥१०१॥ जातिक्रियादिप्रवृत्तिनि

मित्ताभावान्मनोवाचामगोचरमतएवमौनंतथाप्रियोगीप्रत्यक्षंयद्ब्रह्मतत्सर्वदाबुधो

ध्या३ विवेकीभवेत्तदहमस्मीत्यनुसंदध्यादि॥ २॥ ननुइदंप्रत्यगभिन्नब्रह्मानुसंधानंध्यान ध्या२

रूपंचतुर्दशमंगमग्रतीयतेइत्यस्यास्याप्रकारांतरेणमौनमेवलक्षयति॥ ७॥ सोऽईन॥ ७॥

वाचायस्मान्निवर्त्तंतेतद्वक्तुंकेनशक्यते॥ प्रपंचोयदिवक्तव्यः सोपिशब्दविवर्जितः॥ इतिवायद्भवेन्मौ

सदार

नं स्वतां सहज संज्ञिकं ॥ छ ॥ अयं भावः ॥ शब्दप्रवृत्तिनिमित्ताभावाद्यान्यथा वाग्वि
षयं तथा जात्यादिप्रपंचोपि सर्वेदिविकल्पात् स्वतत्वाद्यागतीतः इति विवादस्यागो वा मौ
नं । केषांचित्पाशांक्यस्वतां चेदं प्रसिद्धमित्याह ॥ सहजस्थितिनाम्ना प्रसिद्धमित्यर्थः ॥
ननु वाग्विषयमप्रसिद्धं मौनमिति चेदत आह ॥ छ ॥ गिरां मौनं तु बालानामयुक्तं ब्रह्म
वादिभिः ॥ ४ ॥ स्पष्टं ॥ इदानीं देशं लक्षयति ॥ छ ॥ आदावंते च मध्ये च जनो यस्मिन्न
विद्यते ॥ येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ५ ॥ अत्र जनस्य त्रैकालिकाभाव अ
नुभाविकः स्वप्रतीत्याज्ञेयो न तु लौकिकः रागात्रीयमतीतिभ्यां विरोधादिति भावः ॥ स्प
ष्टमन्यत् ॥ ५ ॥ अथ कालं लक्षयति ॥ छ ॥ कलनात्सर्वभूतानां ब्रह्मादीनां निमिषतः ॥ काल
शब्देन निर्दिष्टो ह्यखंडानंद अद्वय ॥ ६ ॥ निमेषतः आरभ्य कलनात् आकलनात् सर्गस्थि
तिप्रलयाधारत्वादित्यर्थः ॥ शेषं स्पष्टं ॥ छ ॥ आसनं लक्षयति ॥ छ ॥ सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिं

तनं॥४॥आसनं तद्विजानीयाद्येन स्यात्सुखनाशनं॥ ॥यस्मिन्सुखे सुखस्वरूपे ब्रह्मणि चिंतनं क
र्तव्या कर्तव्याचिंतानेवमवेत्तदासनं विजानीयादित्यन्वयः॥ कीदृशं ब्रह्माजस्रं कालत्रया
वस्थायीत्यर्थः॥ सुगममन्यत्॥ ६॥ प्रसंगादासनविशेषं लक्षयति॥ ७॥ सिद्धं यत्सर्व
भूतादिविश्वाधिष्ठानमव्ययं॥ यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः॥ ८॥
सिद्धं च तदासनं चाथवा सिद्धानामासनमिति। कर्मधारयतत्पुरुषसमासाभ्यां ब्र
ह्मैव इत्यर्थः॥ ८॥ अथ मूलबंधं लक्षयति॥ ७॥ यन्मूलं सर्वभूतानां यन्मूलं चित्तबं
सो- धनं॥ मूलबंधः सदा सेव्यो योग्योसौ राजयोगिनां॥ ९॥ चित्तबंधनं चित्तबंधकारणं
मूलाज्ञानं यन्मूलं परागप्रत्यक्तं ब्रह्म सर्वस्य सत्तास्फूर्तिदमित्यर्थः॥ स मूलबंध इत्यन्वयः॥
राजयोगिनां व्यवहारेणाविक्षिप्तचित्तलक्षणयोगश्रेष्ठवतां ज्ञानपरिपाकयु
क्तानामित्यर्थः॥ शेषं स्पष्टं॥ ९॥ इदानीं देहसाम्यं लक्षयति॥ ७॥ अंगानां समतां

षष्ठ

विद्यासमे ब्रह्मणि लीयते ॥ नो चेन्नैव समानत्वमज्जु हं सुखं दृष्टव

त् ॥१०॥ उंगानां ब्रह्मण्यध्यस्तानां स्वभावविषमाणां मध्ये स्थान

तसमत्वदृष्ट्या समतां विद्याज्ञानीयात् ॥ समे ब्रह्मणि अंग

वैषम्यमिस्य त्राप्याहारः ॥ तन्नैव लीयते समब्रह्मस्वरूपतया

नुतिष्ठतीत्यर्थः ॥ तर्हि नापत्तौ दोषः ॥ सुक्रदक्षवदत्तूरुजुत्वं

तत्समानत्वं नैव संवेदितसंबधः ॥ उंगानां विषमस्वभाव

त्वादिति भावः ॥१०॥ इदानीं दृष्टस्थितिं लक्षयति ॥ दृष्टिं सा

नेमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् ॥ सा दृष्टिः परमोदारा न नासा

ग्रविलोकिनी ॥११॥ दृष्टिं मन्तःकरणवृत्तिं ज्ञानमयीमखंड

ब्रह्माकारामित्यर्थः ॥ कृत्वा प्राप्य सा भावा पवृत्ति व्याप्यत्वाद

लिप्साभावः ॥११॥ ननु तथापि वृत्तिनिमित्ताभावादिंद्रियविष

यब्रह्मरूपत्वेन मनस्य जगतो दर्शनं कथं स्यादस्य स्वारस्यासत्तां

तेरेणाह॥ ९८॥ द्रष्टृदर्शन॥ दृश्यानां विरामो यत्र वा भवेत्॥ दृष्टिस्त
त्रैव कर्त्तव्या न नासाग्रावलोकिनी॥ ११२॥ वा शब्दः पक्षांतरस्योता
मे नाद्द्रष्टादिसर्वत्रिपुटीनामुपलक्षणं ब्रह्मैवेदं सर्वमित्येवमा
त्मैवलिङ्गकार्यष्टिरिति भावः॥ १२॥ अथ प्राणायामं लक्षयति॥ ञ॥ चि
त्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्॥ निरोधः सर्ववृत्तीनां प्रा
णायामः स उच्यते॥ १३॥ मनोधीनत्वात्प्राणस्य मनोनिरोधेनैव प्रा
णनिरोधान्न तु प्राणनिरोधेन पालजलाभिमतेन मनोनिरो
धस्तन्निरोधस्याभावादिति फलितार्थः॥ १७॥ अथ प्राणायामस्या
भिमतरेचकादिविभागत्रयं पालक्षयति॥ [illegible] ॥ सार्द्धेन निषेध
नं प्रपंचस्य रेचकाख्यः समीरणः॥ ब्रह्मैवास्मीति या वृत्तिः पूर
को वायुरीरितः॥ १४॥ ततस्तद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः॥
॥ अनात्मोपलक्षात्मानुसंधानं तद्वापिनीनिरेचकादिशब्दवाच्यानी
ह्यां

तिष्ठावार्थः॥ नन्वयं त्रिविधोपि प्राणायामो न कुत्रापि क्लृप्त इत्यपेक्षायाम
त्राधिकारिणा महार्घेन॥ ४ ॥ अयं चापि प्रगुह्यानां मलानां धारणपीडनं॥ १५॥
उत्तय मुक्तलक्षणः प्राणायामः॥ चकाराद्रेचकत्रयेण उक्त इत्यर्थः॥ प्रगुह्यानां

नादि ४ प्रकर्षेणासंख्यातानां चित्तदियाति संधाचरहितत्वेन बुधानामात्मबोध
युक्तानां निःसंदेहम् अपरोक्षज्ञानिनामित्यर्थः॥ योग्य इत्याध्याहारः॥ त
त्र हेतुः अज्ञानामिति॥ १५॥ इदानीं प्रत्याहारं लक्षयति॥ विषयेष्वा

शि ७ त्मता दृष्ट्वा मनसश्चित्तमज्जनं॥ प्रत्याहारः स विज्ञेयो अभ्यसनीयो मुमुक्षुभिः॥ १६
विषयेषु घटादिषु वारणादिषु अन्वयव्यतिरेकाभ्यामात्मभावं सत्तास्फु
रणामात्रं दृष्ट्वा अनुसंधाय तत्रैति रोधः॥ आत्मत्वावेन मनसो तत्करणस्य चि
त्तमज्जनं नाम रूपक्रियानुसंधानराहित्यं स प्रत्याहारः॥ ततः किमत आह
अभ्यसनीय इति॥ १६॥ धारणां लक्षयति॥ यत्र यत्र मनो याति ब्रह्मणस्त
त्र दर्शनात्॥ मनसा धारणं चैव धारणा सा परा मता॥ १७॥ यत्र यत्र यस्मिन्प
दार्थे मनो याति गच्छति। तत्र तत्र ब्रह्मणः सत्तादिमात्रस्य नामादिरूपस्य
दर्शनाद नुसंधानात् मनसो धारणं। नन्वाज्ञ आराधिष्ठ चक्रमध्यात्म

धी

यमनसोधारणेप्रसिद्धमतआह॥सो॥कलक्षणाधारणापरोक्षामता॥या
तुपातेजलाक्षिमतामाणायामादिवदपरेतिसावं॥चएवेसम्यक्यद्दयंवेदांतवि
दस्तुप्रवप्रसिद्धिंध्यातयति॥७॥समाधिध्यानलक्षयति॥बद्धेवास्मीतिस
द्वस्यानिरालंबनयास्थितिः॥ध्यानशब्देनविख्यातापरमानंददायिनी॥१८
सद्वस्यास्तविप्रमाणांतरबाधायोग्याहीतिस्तयाऌचायानिरालंबतारेहाप्य
नुसंधानराहित्यलातयास्थितिरवस्थानमित्यर्थः॥१८॥अथास्यसमाधि
रूपंपंचरत्नामंगलक्षयति॥निर्विकारतयावृत्याब्रह्माकारतयापुनः
वृत्तिविस्मरणंसम्यक्समाधिर्ज्ञानसंज्ञितः॥१९॥निर्विकारतयावृत्या
नुसंधानरहितयोनाकरणावृत्यापुनरनंतरमेवब्रह्माकारतयावृत्या
यलूसम्यक्संस्काररहितंवृत्तिविस्मरणंअहंतानुसंधानसमाधिः
पंचदशांगमंगमित्यर्थः॥ननुवृत्तिविस्मरणस्याज्ञानरूपत्वात्कथंस
माधित्वमतःसमाधिविशिनष्टिज्ञानसंज्ञिकः॥ब्रह्माकारमात्रत
स्फु यास्फुरणाद्वदित्यर्थः॥१९॥इदानींयदर्थंसांगमिदंनिदिध्यासनमुक्तंतदा
ह॥इमंचाकृत्रिमानंदंतावत्साधुःसमभ्यसेत्॥वश्या

॥३२॥

१ आवृत्तिकारकाधसाध्यंदेवलंपरसाग्रापिगम्यं॥ >

यावत्क्षणात्तु सः प्रयुक्तः सन्नवेक्षयं ॥२०॥ अकृत्रिमानंदस्वरूपमृतानंद

व्यंजकं निदिध्यासनमित्यर्थः ॥ स्वकाराधयथा बुद्धिवेदांत विचारमुर्पीति ॥२०॥

एवं अभ्यस्यतः फलमाह ॥ ७ ॥ ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ॥

तत्स्वरूपं नैव तस्य विषयो मनसो गिरां ॥२१॥ साधननिर्मुक्तः साधनाभ्यास

तपरहितः इत्यर्थः ॥ एतस्य तद्वेदांत प्रसिद्धं स्वरूपं ब्रह्मैवेति भावः ॥२१॥ अथ समा

३७ धि मनापूलपं यतापि सुवूर [illegible] स्यनादरोनकायदूस्यात [illegible] घान्यांश ॥ ॥ छास

माधोत्क्रियमाणे तु विघ्नान्यापांतिवैबलात् ॥ अनुसंधानराहित्यं समालस्य

भोगलालसं लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता ॥ एवं यद्विघ्नबा

विदा हुल्यं त्याज्यं ब्रह्मविदा शनैः ॥ ३ ॥ तत्रालस्यं निद्रा तमः कार्याकार्यविवेकः विक्षेपो वि

षयस्मरणं रसास्वादो धन्योहमित्यानंदाकारवृत्तिः ॥ च पुनः शून्यता

मूढापयः स्थूलैस्य थे [illegible] व [illegible] रवबे [illegible] मोक्षकारणमित्यादि ॥ [illegible] भावव

त्यते १ ति १ या २

32

स्याहि नावस श्रन्य व्याहि श्रन्यता॥ ब्रह्म स्वरूप्याहि पूर्णत्वं तयाप्पूर्णमभ्यसेत॥२४॥
भावव्याघ्रघटाघाकारव्याभावत्वं तमयत्वं श्रन्य व्याआभावव्यपेसर्यं श्र
स्वताज्जेइ तातीतलोकप्रसिद्धोत घाब्रह्माकारव्याप्पूर्णत्वंहीतिविद्धप्रसि
त द्धो ततः किमत आहौयेति॥२४॥ तत्र ब्रह्मवर्त्तिं स्लोतु मितरव्लिनि
देति॥ छायेहि वृत्तिं विज्ञायोनां ब्रह्मा स्व्यांपावनीपूर्णातेतु वयोवृद्धी
वेति पश्चुनि श्रसमानरा॥२५॥ सुगमेता मेववर्त्तिंस्लोतिाये हि वृत्ति
विज्ञानं तिज्ञा साप्पिवृद्धं यंतिये तत्वैसपुरु षाधन्यावं [illegible]त्ते नुवनत्रपे॥२६॥
सुगमं॥ तुसत्वे ततु मातार बावृत्तिः समा[illegible] परिपक्वाच सापुनः
तेवैसद्बुद्धतांप्राप्ता नेतरे ब्रह्मवादिनः॥ सुगमं॥ तानेवनरा दवादिनो निंदति।
ल० कुशला ब्रह्मवार्त्तायां वृत्तिहीनाः सुरागिणः॥ तेप्यज्ञानतमाऽस्तत्पुनरायांति
यांति च॥२८॥

व ३ प्या ४

यत एव तेस्मात॥२८॥ निमेषार्द्धं न तिष्ठंति वृत्तिं ब्रह्ममयीं विना॥ यथा
तिष्ठंति ब्रह्माद्याः सनकाद्याः शुकादयः॥२९॥ यथा ब्रह्मादयास्तथा सन
काद्याः यथा सनकाद्यास्तथा शुकाद्या इति संप्रदायादर्शितः॥ एतेन
ब्रह्मादिसेव्यत्वादतिश्रेष्ठायं समाधिपर्यंतो राजयोगः सर्वदा मुमुक्षु
भिः सेवनीय इति ध्वनितं॥२९॥ तदेवं स्वामिमतं सांगयोगमभिधाय पू
र्वोपक्रांतं सांख्यापरपर्यायं [illegible] एवं वेदां
तविचारमुपसंहरति॥ कार्ये इत्यादिपंचभिः श्लोकैः॥ कार्ये कारणता
याता कारणे न हि कार्यता॥ कारणत्वं ततो नश्येत् कार्याभावे विचारतः॥३०॥
भयं घटपटादिरूपे विकारे कारणता मृदादिरूपा सर्वविकाराधिष्ठानता
आयाता अनुगता कारणे तु कार्यता नहीति प्रसिद्धं ततः कारणे कार्या
भावे कारणत्वं नश्येत्॥ ननु कथं कारणकार्यभावो नश्यति तत्राह विचारत इ

८३

तिः यथाऽयं दृष्टांतस्तथाऽकाशादिकार्येऽस्तीत्यादि सत्तारूपव्यवहारहेतोः
सत्यज्ञानादिरूपब्रह्मणः कारणता ब्रह्मणि तु आकाशादिकार्यं तानन्हीति
अतः परमार्थतः आकाशाद्यभावे ब्रह्मणः कारणतापि नहीति द्रष्टव्यो
ऽर्थः ३०। ततः किं मत आह। अथ शुभेवेद् वस्तु यद्वै वाचामगोचरं। ब्रह्मव्य
स्त्य दैन्ये वेद्दृष्टो तेन तु पुनः ३ नः॥३१॥ अथानंतरं कारणत्वेन विवर्ते यद्ब्रह्मवि
ष्णुरूपं मनोवाचामगोचरं वस्तु तद्वेदान्तेषु वेदलक्षणिवृत्त्येन वेदा विचारि
तं पुनरस्य येव भावितोऽयतः आह दृष्टव्यमिति।३१। न केवलमयं विचार
ज्ञानसाधनमेवापि तु ध्यानसाधनमपीत्याह। अनेनैव प्रकारेण वृत्तिर्ब्रह्मा
त्मिका भवेत्तु उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परं।३२। सुगमं तमेव विचारवि
शदयति कस्मात् कारणव्यतिरेकेण पुमानाको विलोकयेत् अन्वयेन पुनस्त
त्कार्ये नित्यं प्रपश्यति।३३। कार्ये हि कारणं पश्येत् पश्चात्कार्यं विसर्जयेत् कारणं
त्वस्यतो गच्छेत् दवशिष्टं भवेन्मुनिः।३४। आदौ प्रथमं कारणव्यतिरेकेण कार्यं विर

द्धं४ द्द

शि०

सा३

नुसंदध्यात्॥ कार्यविसर्जने सन्निकारणं स्वत एव गच्छेत्॥ एवं कार्यकारणवर्जनेऽव
शिष्टस्वचिन्मात्रं मुनिर्मननशीलः स्वयमेव भवेदिति॥ २७॥ ननु विचार
जन्यापरोक्षज्ञानेनैवान्यथास्थितं वस्तु यथास्थितं भवेत्॥ परं तु परोक्षज्ञान
मात्रेण कथं भवेदित्याशंक्य सदृष्टांतमाह॥ भावितं तीव्रवेगेन यद्वस्तु नि
श्चयात्मना॥ पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत्॥ २५॥ अयं भावः॥ यद्यप्यप
रोक्षज्ञानेन भ्रमान्तर्गताऽवरणनिवृत्तावपि भ्रमेयगतभावरणं न निवर्तते त
थापि निश्चयात्मनाऽनिश्चयबुद्ध्या पुरुषेण यद्वस्तु तीव्रवेगेनाहर्निशाभ्यासाद्भावि
तं चिंतितं तद्वस्तु ज्ञेयमतिशीघ्रं पुमान् ज्ञाता भवेत्॥ इति सर्वलोकप्रसिद्धं तमेव
दृष्टांतमाह॥ भ्रमरकीटवदिति॥ भ्रमरेणानीतो जीवन्नेव स्वकुड्यां भावशीलो यः
कीटः स यथा भयाद्भ्रमरध्यानेन भ्रमर एव भवति तद्वदिति॥ २५॥ यतो भावना
बलादन्यस्यान्यत्वं चेत् किं पुनस्तद्वेव न स्यात्॥ ४१॥ अदृश्यं भावरूपं च सर्व
मेव चिदात्मकं॥ सावधानतया नित्यं स्वात्मानं चैव भावयेत्॥ ४२॥ अदृश्यं दृश्य

रूपं भावरूपं दृश्यरूपं च व्याकाशादवसानं तु सर्वं भिन्नस्वभावमपि चिदात्मकं नि
र्विशेषस्फुरणमात्रस्वरूपं भावयेदित्यर्थः ॥ चपुनः तमेव स्वात्मानं सावधा
नतया नित्यं भावयेदिति ॥१३९॥ एतदेव विवृणोति ॥ दृश्यं ह्यदृश्यतां
नीत्वा ब्रह्माकारेण चिंतयेत् ॥ विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्ण
या ॥१४०॥ दृश्यं घटपटादिकं अदृश्यतां चिद्रूपतां नीत्वा हीति विद्वत्प्रसिद्धौ
ब्रह्माकारेण कल्पितपरिच्छिन्ननामादिनिवृत्तौ बृहदाकारेण परिच्छिन्न
स्वरूपेण चिंतयेत् ॥ ततः किमित आह ॥ चिद्रसपूर्णया स्फुरत्सुखपूर्णया धिया
नित्यसुखे विद्वांस्तिष्ठेदिति ॥१४०॥ इदानीमुक्तस्यापि मतयोगमुपसंहरति ॥ ए
भिरंगैः समायुक्तो राजयोग उदाहृतः ॥ किंचित्पक्वकषायाणां हठयोगेन सं
युतः ॥१४१॥ किंचित्स्वल्पपक्वदग्धाः मलाः रागद्वेषा येषां तेषां हठयोगेन संयु
तं उक्तेन प्रसिद्धेनाष्टांगयोगेन संयुक्तोयं वेदांतोक्तो योग इति ॥१४१॥
अयमेव केषां योग्य इत्याकांक्षायां सर्वग्रंथार्थमुपसंहरन्नाह ॥ परिपक्वं

व

मनो येषां केवलोयं चासिद्धिदः गुरुदैवतभक्तानां सर्वेषां सुलभो जयात्॥ १२॥ येषां मनः परिपक्वं रागादिमलरहितमिति यावत्॥ तेषां मित्यध्याहारः। तेषां किंभूतानां रिषड्वर्गाणां पुरुषधुरंधराणां केवलपातंजलाभिमतयोगनिरपेक्षाणां॥ अवेदांताभिमतयोगः सिद्धिदः प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा स्वस्वरूपावस्थानलक्षणमुक्तिप्रदः। चकारोवधारणे। नान्येषाम परिपक्वमनसामित्यर्थः॥ ननु परिपक्वमनस्त्वातिदुर्लभमिति याकांक्षायाम स्यापि साध्यसारगोप्यं तु रंगसाधनमाह। गुरुभिर्दैवतभक्तानामिति। जयादिनिरिस्त्रषामित्यर्थः। सर्वेषामिति पुरुषवर्णाश्रमादिनिरपेक्षं मनुष्यमात्रं ग्रहीतव्यं॥ अतएव गुरुदैवतभक्तेरंतरंगत्वं। तथा च श्रुतिः। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति। स्मृतिश्च। तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। ।

35

श्राद्ध।वांछुमतेज्ञानंदस्साध्या।अयं भावः।गुरुदैवतकोपेनां परिपक्वमनस्त्वा
च्युतिदुःसाध्यान्यपिसाधनानिसुसाध्यानि भवंतीति।हेतो गुरुदैवतप्रजुन
मेवस्वधर्माऽविरोधेन सर्वैः कार्यमिति परममंगलं॥२॥ पूर्णयमोपरोक्षे
ण ब्रह्मज्ञानप्रकाशिका॥ आपरोक्षानुभूत्याख्या ग्रंथराजप्रदीपिका॥३॥न
मस्तस्मै भगवते शंकराचार्यरूपिणे॥ येन वेदांतविद्येयमुद्धृता वेदसागरात्॥२॥
यथयं शंकरः साक्षाद्वेदांतांभोजभास्करः॥ नोतर्हि कारोतकथं वेदव्यासादि
स्तच्चितं॥७॥ अत्र यत्संमतं किंचिन्न गुरोरेव मे नहि॥ असंमतं तु यत्किंचित्तन्म
मैव गुरोर्न हि॥४॥ यत्प्रसादादहं ब्रह्म सत्यानंदं बने हि सः॥ अहं जसे गदालं
बः कार्यकारणवर्जितः॥५॥ तस्य श्रीगुरुराजस्य पदाब्जे सुसमर्पिता॥ दीपिका
मालिकासेयं यत्नतो पागुणगुंफिता॥६॥ योहं स्वाज्ञानमाशास्त्रगदिदमभवस्वा
दिदेहांतमादो स्वस्वस्याद्दीवसोहं दृढतारमधुनाकेवलं स्वात्मबोधात्॥ प्रत्यैवा
स्याद्वितीयं परमसुखमयं निर्विकारावबोधां जाग्रत्यादीश्वरो गुरुरिदमवदन्नंतमस्या

ता

दिवाक्ये ॥७॥ इति श्रीमत्परमहंसपरिव्राजकाचा
र्य श्रीमद्भगवत्पादशिष्य श्रीमच्छंकराचार्यविरचितं पुरो
क्षानुभूतिदीपिका समाप्ता ॥७॥ ॥७॥ ॥ आथ स्तानीम
हिमा ॥ ॥ तीर्थे वा श्वपचगृहे नष्टस्मृतिर्वा परिसृजन्देहं ॥
ज्ञानसमकालमुक्तः कैवल्यं याति विगतशोकः ॥१॥ रथ्यांतरे मू
त्रपुरीषमध्ये चंडालवेश्म मथवा श्मशाने ॥ कृतप्रयत्नोदेहा
वसाने लभेत चमोक्षं ॥२॥ जनिवा दांप्तिति स्पर्ने नावमान्य
नैविकिंचन ॥ न चैव देहमाश्रित्य वैरमस्मिन् केन चित् ॥३॥ न कुर्यात् न

ह्यकृतप्रयत्नो

वदेत्किंचिन्न ध्यायेत्सा व स्वापुवा ॥ आत्मारामो नयावस्था
त्रिचरे ऽज्ञउवन्मुनि: ॥ ५ ॥ अकिंचनस्य दांतस्य शांतस्य स
मचेतस: ॥ मया संतुष्टमनस: सर्वा: सुखमया दिश: ॥ ६ ॥ नि
र्वासनो निरालंब: स्वच्छंदो मुक्तबंधन: ॥ क्षिप्त: संस्कारवाते
नैन चेष्टते शुष्कपर्णवत् ॥ ७ ॥ मोहं न स्यन्नहि वासोस्ति नग्ना मा
तरमेव वा ॥ अस्तानह्हदयग्रंथिनी रागो मोक्ष इति स्मृत: ॥ ८ ॥
अहिमिव जनयोगं सर्वदा वर्जयेद्य: कुणपमिव सुनारीं त्य
क्तकामो विरागी ॥ विषमिव विषयान्सिं मन्यमानो दुर

परोक्षानुभूति

ममार

गां जयति परमहंसो मुनिभावं समेति ॥ ८७ ॥ ॥ ८४ ॥

भारते चरमाध्याये व्यासोक्तिः ॥ ॥ अजरममिवं ध्येयं

यथा घृतं स्म सगुणमगुणमाद्यं स्थूलमस्थूलं न सूक्ष्मं ॥

निरुपममनुपेयं योगिनां ज्ञानगम्यं । त्रिभुवनगुरु

मीशं त्वां प्रपन्नोस्मि विष्णो ॥ १ ॥ ग्रंथसंख्या ॥ ६६ ॥

॥ श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यै नमः ॥

अपरोक्षानुभूतिः

37

[OrderDescription]
,CREATED=18.10.20 11:37
,TRANSFERRED=2020/10/18 at 11:43:59
,PAGES=73
,TYPE=STD
,NAME=S0004113
,Book Name=M-1075-APROJHANUBHAVDIPIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF

FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF

FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF

FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF

FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,